Digitized by eGangotri and Sarayu Trust.

6338

Price -/12/-

BIBLIOTHECA INDICA:

A

COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL.

NEW SERIES, No. 972.

PRATAP SINGH



प्राकृतपैङ्गलम् ।

‘PRĀKṚITA-PAINGALAM’

EDITED BY

CHANDRA MOHANA GHOSHA, M.B., B.A.

AUTHOR OF "CHHANDAH-SĀRA-SANGRAHAH," A COMPENDIUM OF SANSKRIT PROSODY.

FASCICULUS II.

CALCUTTA:

PRINTED AT THE BAPTIST MISSION PRESS,

AND PUBLISHED BY THE

ASIATIC SOCIETY, 57, PARK STREET,

1900.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

6338

Price -/12/-

BIBLIOTHECA INDICA:

A

COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL.

NEW SERIES, No. 972.

PRATAP SINGH ...

6005



प्राकृतपैङ्गलम् ।

PRĀKRITA-PAINGALAM

EDITED BY

CHANDRA MOHANA GHOSHA, M.B., B.A.

AUTHOR OF "CHHANDAH-SĀRA-SANGRAHAH," A COMPENDIUM OF SANSKRIT PROSODY.

FASCICULUS II.

CALCUTTA:

PRINTED AT THE BAPTIST MISSION PRESS,
AND PUBLISHED BY THE
ASIATIC SOCIETY, 57, PARK STREET,

1900.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

LIST OF BOOKS FOR SALE

AT THE LIBRARY OF THE

ASIATIC SOCIETY OF BENGAL,

No. 57, PARK STREET, CALCUTTA,

AND OBTAINABLE FROM

THE SOCIETY'S AGENTS, MESSRS. LUZAC & CO.,

46, GREAT RUSSELL STREET, LONDON, W. C., AND MR. OTTO

HARRASSOWITZ, BOOKSELLER, LEIPZIG, GERMANY.

*Complete copies of those works marked with an asterisk * cannot be supplied—some of the Fasciculi being out of stock.*

BIBLIOTHECA INDICA.

Sanskrit Series.

		Rs.	
Advaita Brahma Siddhi, (Text) Fasc. 1-4 @ /6/ each	...	1	8
*Agni Purāṇa, (Text) Fasc. 4–14 @ /6/ each	...	4	2
Aitarēya Brāhmaṇa, Vol. I, Fasc. 1-5 and Vol. II, Fasc. 1-5 Vol. III, Fasc. 1-5 Vol. IV, Fasc. 1-5 @ /6/	...	7	8
Aṇu Bhāṣyam, (Text) Fasc. 1-5 @ /6/ each	...	1	14
Aphorisms of Sāṇḍilya, (English) Fasc. I	...	0	12
Aṣṭasāhasrikā Prajñāpāramitā, (Text) Fasc. 1-6 @ /6/ each	...	2	4
Açvavaidyaka, (Text) Fasc. 1-5 @ /6/ each	...	1	14
Avadāna Kalpalatā, (Sans. and Tibetan) Vol. I, Fasc. 1-5; Vol. II. Fasc. 1-5 @ 1/ each	...	10	0
*Bhāmatī, (Text) Fasc. 4-8 @ /6/ each	...	1	14
Bhāṭṭa Dīpikā Vol. I, Fasc. 1-2	...	0	12
Bṛhaddēvatā (Text) Fasc. 1-4 @ /6/ each	...	1	8
Bṛhaddharma Purāṇa, (Text) Fasc. 1-6 @ /6/ each	...	2	4
Catalogue of Sanskrit Book MSS. in the Society's Library, Fasc. I and II @ 2/	...	4	0
*Caturvarga Chintāmaṇi (Text) Vols. II, 1-25; III. Part I, Fasc. 1-18. Part II, Fasc. 1-10 @ /6/ each	...	19	14
Çlokavartika, Fasc. I (English)	...	0	12
*Çrauta Sūtra of Āpastamba, (Text) Fasc. 4-14 @ /6/ each	...	4	2
Ditto Lāṭyāyana, (Text) Fasc. 1-9 @ /6/ each	...	3	6
Ditto Çāṅkhāyana, (Text) Vol. I, Fasc. 1-7; Vol. II, Fasc. 1-4, Vol. III, Fasc. 1-4 @ /6/ each	...	5	10
Çrī Bhāshyam, (Text) Fasc. 1-3 @ /6/ each	...	1	2
Gadadhara Paddhati Kālasāra Vol I. Fasc. 1	...	0	6
Kāla Mādhava, (Text) Fasc. 1-4 @ /6/ each	...	1	8
Kāla Viveka, Fasc. 1-4	...	1	8
Kātantra, (Text) Fasc. 1-6 @ /12/ each	...	4	8
Kathā Sarit Sāgara, (English) Fasc. 1-14 @ /12/ each	...	10	8
Kūrma Purāṇa, (Text) Fasc. 1-9 @ /6/ each	...	3	6
Lalita-Vistara, (English) Fasc. 1-3 @ /12/ each	...	2	4
Madana Pārijāta, (Text) Fasc. 1-11 @ /6/ each	...	4	2
Mahā-bhāṣya-pradīpōdyōta, (Text) Fasc. 1-7 @ /6/ each	...	2	10
Manutīkā Saṅgraha, (Text) Fasc. 1-4 @ /6/ each	...	1	2
Mārkaṇḍēya Purāṇa, (English) Fasc. 1-6 @ /12 each	...	4	8
*Mīmāṁsā Darçana, (Text) Fasc. 7-19 @ /6/ each	...	4	14
Nārada Smṛti, (Text) Fasc. 1-3 @ /6/	...	1	2
Nyāyavārtika, (Text) Fasc. 1-4 @ /6/	...	1	8
*Nirukta, (Text) Vol. III, Fasc. 1-6; Vol. IV, Fasc. 1-8 @ /6/ each	...	5	4

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

PRATAP SINGH MUSEUM, SRINAGAR
6005

४९ । इदानीं मात्रावृत्तेर्वा वर्णवृत्तेर्वा कियन्तो गुरवः कियन्तो लघव इति ज्ञानार्थमाह पुच्छलेति । पृष्टच्छन्दः कलाः कृत्वा पृष्टवर्णान् लोपय । अवशिष्टं गुरुं जानीहि लघवो ज्ञायन्ते तावन्त इति ॥ गुरो[र]वशिष्टा यावन्तस्तावन्तो लघव इत्यर्थः । उदाहरणेनास्यार्थः स्पष्टीक्रियते । पढ़मं बारह मत्तेति — कियन्तो लघवः कियन्तो गुरव इति प्रश्ने, सर्व्वलघवः कर्त्तव्याः, तेन ५७ सप्तपंचाशत् कला भवन्ति, तत्र पृष्टच्छन्दसो वर्णाः कर्त्तनीया भवन्ति, ३७ सप्तत्रिंशद्वर्णा अत्र सन्ति, सप्तपंचाशदङ्के सप्तत्रिंशत्-कर्त्तने विंशत्यङ्कोऽवशिष्यते, तेन विंशतिर्गुरवोऽत्रेति ज्ञायते । गुरोश्च द्विकलत्वाद्विंशतिगुरुभिश्चत्वारिंशत् ४० कला गताः, ५७ सप्तपञ्चाशन्मध्ये ४० चत्वारिंशल्लोपे १७ सप्तदश अवशिष्टास्तेन सप्तदश लघव इति ज्ञायते । अथवा सर्व्वलघूकृताङ्के योऽङ्कः कर्त्तितः तत्रैव गुरोरङ्ककर्त्तनेनावशिष्टा लघवो ज्ञेयाः, यथात्र सप्तपञ्चाशदङ्के ३७ सप्तत्रिंशत्कर्त्तनेन विंशतिर्गुरवो ज्ञेयाः, सप्तत्रिंशदङ्के च विंशतिकर्त्तनेनावशिष्टाः सप्तदश लघवो ज्ञेयाः । एवं वर्णवृत्तेऽपि, यथा प्रमाणिकाच्छन्दसि सर्व्वलघूकरणेऽष्टचत्वारिंशत् ४८ कला भवन्ति, तत्र च श्लोके द्वात्रिंशद्वर्णा ३२ भवन्ति, अष्टचत्वारिंशदङ्के ४८ द्वात्रिंशल्लोपे ३२ षोड़शलाभात् षोड़शात्र गुरव इति ज्ञायते, अवशिष्टाश्च षोड़श लघव इति ज्ञायते । (C).

४९ । अथैतावत्संख्याककलाविशिष्टैतावत्संख्याकाक्षरचरणे वृत्ते कति गुरवः कति लघव इति कौतुकात्केनचित्पृष्टे उत्तरप्रकार-माह, पुच्छलेति । पुच्छल छंद कलां — पृष्टच्छंदःकलायाम्, अत्र

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

कलापदस्य कलासंख्यापरत्वात्पृ[ष्ट]च्छंदःकलासंख्यायामित्यर्थः। यस्य गुरुलघुजिज्ञासा तत्पृष्टं छंदस्तस्य या मात्रासंख्या तन्मध्ये इत्यर्थः। पुच्छल [अंक] छंद—पृष्टं छंदः, अत्रापि छंदःपदस्य छंदोऽक्षर-संख्यापरत्वात्पृष्टच्छंदोऽक्षरसंख्यामित्यर्थः। मेटाव—हीनां कुरु। एवं करि—[एवं] कृत्वा एवं कृते सतीत्यर्थः। अवसिट्ठउ—अवशिष्टा संख्येति शेषः, कलासंख्यामध्योर्वरिता संख्येत्यर्थः, गुरु जानिअङ—गुरोर्ज्ञातव्या, उताव—उर्वरिता गुरुसंख्यातिरिक्ता वृत्ताक्षरसंख्येति यावत्। लघु जाणिअ—लघोर्ज्ञातव्या। यथा अष्टादशकलाविशिष्टै-कादशाक्षरचरणे वृत्ते कति गुरवो लघवश्चेति पृष्टे, अष्टादशरूप-कलासंख्यामध्ये एकादशरूपाक्षरसंख्यालोपे उर्वरिता सप्तसंख्या, सा गुरुसंख्या ज्ञेया। एकादशाक्षरमध्ये यदि सप्त गुरवस्तदोर्वरिता चतुष्कसंख्या, सा लघोर्ज्ञातव्या, एवं चैतादृशचरणे वृत्ते सप्त गुरव-श्चत्वारो लघव इत्युत्तरं देयमिदं च वृत्तमिंद्रवज्राख्यमेवमन्यत्रा-प्यूह्यम्। (E).

४९। अथ छन्दःसु गुरुलघुमात्रावर्णयत्ताज्ञानोपायमाह॥ पुच्छेति॥ पृष्टस्य छंदसः कलाः कुरु, पृष्टे वर्णान् लोपय। अव-शिष्टा गुरवो ज्ञायंते, लघवो ज्ञातव्या उर्वरिताः॥ पृष्टे कलासं-ख्यायामित्यर्थः, वर्णादीनां तद्गतसंख्योच्यते॥ यथास्यैव छंदसः मात्रासंख्या ४८, वर्णसंख्यया ३५ ऊनिता जाता १३, एतावती गुरुसंख्या॥ इयमेव वर्णसंख्योनिता जाता २२ लघुसंख्या, इयमेव १३ गुरुद्विगुणसंख्यया २६ मिलिता जाता मात्रासंख्या ४८, इयमेव गुरुसंख्योनिता वर्णसंख्या ३५ इति॥ ४९ (G).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

[Compare this with Pingala's Sanskrit aphorisms, and the learned commentary of Haláyudha thereon, also with a symbolical exposition of the same in Ghosha's छन्दःसारसंग्रहः p. 34, paras. 2, 3 and 4. —Ed.]

[Between ४९ and ५०, the following slokas are inserted in MS. (F). This is apparently a later addition, for their enumeration even is not subsequently adhered to.—Ed.]

मत्तासंख्ये कोठ करु पंती छक्क पथारि ।
तत्थ दुआदिक अंक धरु पढ़महि पंति बिचारि ॥ ५० ।
आइ अंक परिज्जि कऊ सब्बहि पंती मझारि ।
पुब्ब जुअल सरि अंक धरु बीजौ पंति बिचारि ॥ ५१ ।
पढ़म पंति ठिअ अंक करि बीजौ पंति गुणेहि ।
जो जो अंका उहरइ ते तीय पंति भरेहि ॥ ५२ ।
बि पिट्ठइ भेअ जोअइ अंका लऊआ कोट्ठा पूरइ अंका ।
पूआ लऊआ हारा तेक्खइ पिंगल जंपे बसा दुअइ ॥ ५३ ।
छ पंती पत्थार करिज्जसु अक्खरसंख कोट्ठ धरिज्जसु ।
पहिली पंति बस धरिज्जसु दुसरी पंति दूण करिज्जसु ॥ ५४ ।
अक्खर अंक गुणित करि लेहि चौ[चउ]थी पंति सोइ लिहि देइ ।
चौथी अद्धा पंचम पंति सोइ छट्ठ मिलिऊ णिभ्भंत ॥ ५५ ।
पंचमी चौथी तिअहि मिलाउ पिंगल जंपइ अंक फलाउ ।
बित्त भेअ मत्त अरु बसह गुरु लऊ एम संपस ह ॥ ५६ ॥
अक्खर मक्कइ जाणऊ लोइ जे जाणे मण आणंद होइ ।
जो बुज्झइ सोइ पै बुज्झइ मक्कइ जाल हत्थि बि रुज्झइ ॥ ५७ ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

[The corresponding gloss in commentary (G) runs thus:--Ed.]

अथ प्रस्तारसंख्या ।

मात्रासंख्यान् कोष्ठान् कुरु पंक्तिषट्कं प्रस्तारय, तत्र द्व्यादिकानंकान् धारय प्रथमपंक्तिविचारः । द्व्यादिकोष्ठेषु द्व्याद्यंका लेख्या इति प्रथमपंक्तेर्विवेकः ॥ ५० ॥ आद्यंकपरित्यागं कथयतु सर्वासां पंक्तीनां मध्ये पूर्वयुगलसदृशानंकान् धारय, द्वितीयपंक्तिविचारः । उद्दिष्टवदंका लेख्या इति द्वितीयपंक्तिविचार इत्यर्थः ॥ ५१ ॥ प्रथमपंक्तिस्थितांकैः कृत्वा द्वितीयपंक्तिं गुणय । यो योऽंक उत्पद्यते तेन तृतीयपंक्तिं भरय ॥ ५२ ॥ अथ पंचमपंक्तिपूरणं, विपि । अत्रांकशब्दस्य व्यत्यासेन योजनाद्द्वौ पृष्टांकौ भेदांकं च योजय । लघुकैः कोष्ठान् पूरय अंकैः । पृष्टांकद्वयं भेदांके चैकीकृत्य पंचमपंक्तिकोष्ठाः पूरणीयाः, ते लघुसंख्याका भवंतीत्यर्थः । यथा । तत्र प्रथमे कोष्ठे पूर्वांकयोः पूर्वोर्द्ध्वांकसंख्याप्रभेदांकस्य चाभावादेक एव ॥ द्वौ[द्वि]तीये कोष्ठे पूर्वांक एकस्तदूर्द्ध्वसंख्याभेदांकस्यैकस्तयोर्योगे द्वयं ॥ तृतीये कोष्ठे पूर्वांकयुगलं १ । २ ऊर्द्ध्वप्रभेदांकयोर्योगे पंच ५, तत्तृतीये लेख्याः ॥ चतुर्थकोष्ठे पूर्व्वांकयुगलं २, ५ पूर्वोर्द्ध्वांकः वृत्तभेदांकस्य तद्योगे दश ॥ एवमग्रेऽपि । अथ षष्ठपंक्तिः पूर्णा इति । पूर्व्वौ लघुकौ हारः, लघुद्वयं गुरुर्भवतीत्यर्थः, यथा प्रथमकोष्ठे लघुद्वयाभावाद्गुरुस्थाने शून्यं, द्वितीयकोष्ठे एक १ स्तृतीये द्वौ २ चतुर्थे ५ इत्यादि षष्ठपंक्तिपूरणं ॥ अथ चतुर्थपंक्तिः । तेक्खइ । तथा पिंगलो जल्पति वर्णान्द्वाभ्यां । गुरुलघुयोगे वर्णा भवंतीति चतुर्थपंक्तिपूरणम् । इति मात्रामर्कटी ॥ ५३ ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

मात्रामर्कटीचक्रं यथा,—

वृत्त	१	२	३	४	५	६
प्रभेद	१	२	३	५	८	१३
मात्रा	१	४	९	२०	४०	७८
वर्ण	१	३	७	१५	३०	५८
लघु	१	२	५	१०	२०	३८
गुरु	०	१	२	५	१०	२०

वर्णमर्कटीचक्रं यथा,—

वृत्त	१	२	३	४	५	६
भेद	२	४	८	१६	३२	६४
मात्रा	३	१२	३६	९६	२४०	५७६
वर्ण	२	८	२४	६४	१६०	३८४
गुरु	१	४	१२	३२	८०	१९२
लघु	१	४	१२	३२	८०	१९२

अथ वर्णमर्कटी। छ पंती। षट्पंक्तिं प्रस्तारं कुरु, अक्षरसंख्यान् कोष्ठान् धारय, प्रथमपंक्तौ वर्णान्धारय, द्वितीयपंक्तौ द्विगुणान् कुरु ॥ ऊर्द्धाधः षट्पंक्तयो लेख्यास्तिर्यग्वर्णसंख्याः कोष्ठाः कार्याः, तत्र प्रथमपंक्तौ वर्णांकाः, द्वितीयपंक्तौ उद्दिष्टवद्विगुणाअंका लेख्याः ॥ ५४ ॥ अक्ख। अक्षरांकैर्गुणितां क्वला [जा]ता चतुर्थी पंक्तिस्तया[स्सा] लेख्या। चतुर्थ्यर्धा पंचमी पंक्तिः, सैव षष्ठे मिलिता निश्चयात् ॥ प्रथमपंक्त्यंकैर्द्वितीयपंक्त्यंकान् गुणयित्वा चतुर्थी पंक्तिर्लेख्या, तदर्धे पंचमी, तथैव षष्ठी पंक्तिर्भवतीत्यर्थः ॥ ५५ ॥ पंचमीति। पंचमीचतुर्थ्योस्तृतीयामेलने पिंगलो जल्पति अंकान् प्रस्तारय। चतुर्थीपंचमीपंक्तियोगेन तृतीया पंक्तिर्भवतीत्यर्थः। वृत्तानि भेदा मात्रा अन्यद्वर्णा गुरवो लघव एवं संपन्नं भवति ॥ ५६ ॥ अक्षरमर्कटीं जानंतु लोकाः य[ज्]ज्ञाने मनस आनंदो भवति। यो बुध्यते स एव बुध्यते, मर्कटीजाले हस्ती अपि रुध्यते। दुर्गमेति भावः ॥ ५७ ॥ (G).

[Both the figures run to inconvenient lengths in the commentary; the portions here reproduced will enable the reader to extend them as far as he would like. —Ed.]

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अह सकल पत्थार संखा ।

छब्बीसा[1] सत्तसआ

तह[2] सत्तारह सहस्साइं[3] ।

बाआलीसं[4] लक्खं[5]

तेरह कोडी[6] समग्गाइं[7] ॥ ५०[8] ॥ गाहू ।

५०। अत्र चैकाक्षरमारभ्य षड्विंशत्यवधिवर्णवृत्तानां प्रस्तारे कियती संख्येत्यत्राह १३४२१७७२६ षड्विंशतिः सप्तशतानि तथा सप्तदशसहस्राणि द्विचत्वारिंशल्लक्षास्त्रयोदशकोट्यः समग्राणि, अङ्कस्य वामा गतिरित्यङ्काः स्थाप्याः। (C).

५०। अथैकाक्षरमारभ्य षड्विंशत्यक्षरपर्यंतसमस्तवर्णवृत्तपिंडीभूतसंख्यामाह छब्बीसेति। षड्विंशतिः सप्तशतानि तथा सप्तदशसहस्राणि द्विचत्वारिंशल्लक्षाणि त्रयोदशकोट्यः, एवं समग्राणि एकाक्षरादिषड्विंशत्यक्षरपर्यंतानीत्यर्थः वर्णवृत्तानि भवंतीति शेषः। मात्रावृत्तानामसंख्यातत्वात्तत्संख्या नोक्ता, वर्णवृत्तानां प्रत्येकसंख्या ग्रंथविस्तरभयादनतिप्रयोजनत्वाच्चास्माभिरत्र नोक्ता। (E).

५०। अथैकादिषड्विंशत्यंतानां वर्णवृत्तानां भेदैक्यसंख्यामाह, छब्बी। षड्विंशतिः सप्तशतानि तथा सप्तदशसहस्राणि द्विचत्वारिंशल्लक्षाणि त्रयोदशकोटयः समग्राणि। एतावंतः सर्वे भेदा इत्यर्थः।

५०। छब्बिसा (C), छबीसा (D). २ तहा (A), तहं (D). ३ सहस्साइँ (A & D), सहस्साइ (B & C). ४ बाआरीसं (A). ५ रक्खं (C), लक्ख् (D). ६ कोडी (B, C & D). ७ समग्गाइ (C), समगाइ (D). ८ ४८ (A).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अथ गाथाप्रकरणम् । (D).

होइ गाह्न मत्त चउग्रस[1] गाहाइ[2] सत्तावणित्र[3],
तह[4] बिग्गाह[5] पलट्टि किज्जइ[6] उग्गाहउ[7] सट्टिकल[8],
गाहिणीत्र[9] बासट्टि[10] किज्जइ[11] ।
तह बि पलट्टइ[12] सिंहिणी[13] वे ग्रग्गल[14] हो सट्टि[15] ।
सत्तरूत्र[16] ग्रसोस[17] गुण[18] खंध[19] मत्त चउसट्टि[20] ॥
५१[21] ॥ रड्डा ।

द्व्यादिषड्विंशतिपर्यंतं पूर्वपूर्वद्विगुणांकानां योगे एतावंतो भेदा-
इति ॥ (G).

५१ । अथ गाथादीनां लक्षणं विवक्षुः तत्र मात्राविषमत्वमाह । भवति गाहूस्चतुःपञ्चाशन्मात्रा ५४, गाथा सप्तपञ्चाशन्मा[त्रा] ५७, तथा विगाथा वैपरीत्येन क्रियते,—गाथाद्वितीयार्द्धलक्षणं प्रथमार्द्धे, प्रथमार्द्धलक्षणं द्वितीयार्द्धे,—उद्गाथा षष्टिपरा ६०, गाहिन्यां द्विषष्टिः दी[क्रि]यतां ६२। तथैव परिवर्त्य सिंहिनी द्वयाग्रा भवति

---

५१ । १ चउचत्र (B), चउउस (C), चौसस (E & F). २ तह वाहा (A), तह गाहाइ (E). ३ सत्तावणी (A & D), सत्तावस (E), सत्तावणइ (F). ४ वेहि (E). ५ विग्गाहउ (B & C), ६ किज्जउ (B & C, किज्जिसइ (E). ७ उग्गाहाउ (D), उग्गाह (F). ८ सट्ठिपर (B & C), सट्ठिकला (F). ९ गाहि-णिस (E), गाहणिस (F). १० वासठि (E), सावट्ठि (F). ११ कर मत्तह (E). १२ पलटे (D), पलट्टिस (E), पलठइ (F). १३ सींघिणी (A), सिंघिणी (C), सिंघिणी (D), सिंघिणा (E), १४ अग्गा (A & B), अग्ग (C). १५ होइ (A & E). १६ सत्तरुत्र (D & E), होइ सारूप (F). १७ असोणु (C), असोण (D). १८ गण (D), गुणं (E). १९ खन्द (B), खन्ध (C). २० चासट्टि (D), चौसट्टि (E & F). २१ ४९ (A), ५१ (F).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

षष्टिमात्रा, [सप्त]रूपकाणि अन्योऽन्यगुणानि, खन्धके मात्रा चतुः-षष्टिः । परिवर्त्त्येति । पूर्व्वार्द्धपरार्द्धयोर्व्यत्यासे गाथैव विग्गागा[था] भवतीत्यर्थः, गाहिन्याः पूर्व्वार्द्धपरार्द्धयोर्व्यत्यासे सिंहिनी, तत्रापि द्विषष्टिमात्रा भवन्तीति स्पष्टार्थमाह, यथा द्वाधिकेत्यर्थः । रूपकाणि छन्दांसि अन्योन्यगुणयुक्तानि, तेन सर्व्वाण्येव प्रथमतृतीयपादद्वादश-मात्रत्वादियथागुणानीत्यर्थः ॥ (C)

५१ । अथ पुरस्ताद्वक्ष्यमाणानां गाहूप्रभृतिसप्तमात्राच्छंदसां सामान्यतश्चरणचतुष्टयसमुदितां संख्यां रड्डावृत्तेनोद्दिशति, होइ गाहू इति । गाहूनामके छंदसीत्यर्थः, मत्त चौअस — मात्राश्चतुः-पञ्चाशत्, होइ — भवंति, तह गाहाइ सत्तवण्ड — तथा गाथायां सप्तपञ्चाशत् मात्राः भवंतीति पूर्वानुषंगः, तेहि — तां गाथां, पलट्टि — परावर्त्य, गाथायाः पूर्वार्द्धम् उत्तरार्द्धं कृत्वा उत्तरार्द्धं [च पूर्वार्द्धं] कृत्वेत्यर्थः, बिग्गाह — विगाथा, किज्जिअइ — क्रियते । अत्र तेहि इत्येकारो ह्रस्वो बोध्यः एओ सुद्धा अ वस मिलिआ वि लहू इत्युक्तत्वात् [Vide ५म श्लोक p.7.—Ed]. उग्गाहउ — उद्गाथा छट्टिकला — षष्टिकला षष्टिः कला मात्रा यस्याः सेत्यर्थः, गाहि-णिअ — गाहिन्यां, बासट्ठि — द्विषष्टिः, मत्तह — मात्राः करु — कुरु, तह बि पलट्टिअ — तद्विपरीतायां तस्याः गाहिन्याः विपरी-तायामित्यर्थः सिंहिणी — सिंहिन्यां, बे अग्गल — द्वाधिका, सट्ठि — षष्टिः मात्रा इत्यनुषंगः, होइ — भवंति, अत्र हो इत्योकारः पूर्वोक्तदिशा ह्रस्वो बोध्यः । अत्र क्वचित् तह गाहाइ मत्ता[त्ता]-वणी इति, तह बिग्गाह पलट्टि किज्जइ इति च पाठः, स रड्डा-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अथ गाह्न । (F).

पुव्वद्धे[१] उत्तद्धे सत्तगल[२] मत्त बीसाइँ[३] ।
छट्ठमगण पअमभ्झे[४] गाह्न मेरुव्व जुअलाइँ[५] ॥ ५२[६] ॥
गाह्न ।

लक्षणविरुद्धत्वादुपेक्ष्यः । खंध — स्कंधके, मत्त चौ[चउ]सट्ठि — मात्राः चतुःषष्टिर्भवंतीत्यनुषंगः । एतानि सत्तरुअ — सप्तरूपकाणि छंदांसि, अण्णोण्णगुण — अन्योऽन्यगुणानि, अन्योऽन्यं गुणाः षष्ठजगणनलघ्वेक-लघु-पादांतगुर्वादयो येषां तादृशानीत्यर्थः, भवंतीत्यनुषंगः, इति योजना ॥ (E). [Vide Ghosha's Compendium, p. 7.—Ed.]

५१ । अथ मात्राजातीनां कासांचित्कलासंख्यामाह । होइ । भवंति गाह्नमात्राः चतुःपंचाशत्, गाथायाः सप्तपंचाशदेव, तथा बिग्गाहा परावर्त्य क्रियते, उद्गाथा षष्टिकला, गाहिन्यां द्वाषष्टिः क्रियंते । तथा विपरिवर्त्तते सिंहिनी, भवंति सप्त-रूपाणि छंदांसि अन्योऽन्यगुणाः स्कंधके मात्राः चतुःषष्टिः ॥ अन्योऽन्येति गु[ग]णेति पाठे सप्तगु[ग]णाः अन्योऽन्यसंवलिता-भवंतीत्यर्थः ॥ ५१ ॥ (G).

---

५२ । १ पुव्वंद्धे (B), पूव्वद्ध (C), पुव्वद्धें (E). २ सत्तगण (B & C), सत्तगल (D). ३ वीसाइ (B & F), dropt in (C), वीसाइं (D), वीसाइं (E). ४ पअमजभ्झे (B & C), पअमज्झे (F). ५ जुगलाइ (B), जुअलाइं (E), जुअलाइ (F). ६ ५० (A), ५२ (F).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

५२। अथ गाहूलक्षणमाह। पूर्व्वार्द्धे उत्तरार्द्धे सप्तोत्तरविंश-मात्राः २७। षष्ठगणेत्यादिमध्ये गाहू मेरोरेव युगलं॥ तेन पूर्व्वार्द्धे एको लघुरेव षष्ठो गणः, एवमुत्त्रा[त्तरा]र्द्धेऽपि। प्रथमपादे द्वादश मात्रा द्वितीये पञ्चदशेति मिलित्वा सप्तविंशतिमात्राः पूर्व्वार्द्धे, एवमुत्तरार्द्धेऽपि, अ[य]स्य विशेषः पादमध्येस्थितषष्ठगणे मेरोरेव युगलं, मेरुपदेन लघुरुच्यते, मिलित्वा लघुयुगलं, तेन पूर्वार्द्धे एकलघुरेव षष्ठो गणः, एवमुत्तरार्द्धेऽपि। एतादृशलक्षणं यत्र सा गाहूरित्यर्थः॥ (C).

५२। अथ गाहूप्रभृतिसप्तच्छंदःसु सामान्यतो मात्रा उद्दिश्य विशेषतस्तानि लिलक्षयिषुः प्रथमं गाहूं लक्षयति पुब्बद्धे इति। यत्र पुब्बद्धे उत्तद्धे—पूर्वार्द्धे उत्तरार्द्धे, पअमझ्झे—पादयोर्मध्ये पूर्वार्द्धे प्रथमद्वितीयपादयोर्मध्ये, उत्तरार्द्धे तृतीयचतुर्थयोः पाद-योर्मध्ये इत्यर्थः। सत्तग्गल—सप्ताधिकाः, मत्त बीसाइं—मात्राः विंशतिः, सप्तविंशतिर्मात्रा इत्यर्थः, पतंतीति शेषः, छट्ठमगण—षष्ठो गणः, मेरुव्व जुअलाइं—मेरोः युगलं, मेरुर्लघुस्तद्युगल-मित्यर्थः। पूर्वार्द्धे उत्तरार्द्धे च प्रत्येकं गुर्वंताः सप्तगणाः स्थाप्या-स्तत्र षष्ठस्थाने एको लघ्वात्मको गणः स्थाप्यः, अन्यच्च चतुर्मात्रिक-इत्यर्थः, एवं च षण्णां चतुर्मात्रिकगणानां चतुर्विंशतिर्मात्राः, एका च मात्रा षष्ठस्थानस्थलघोर्मात्राद्वयं चांतस्थगुरोरेवमत्र सप्तविंशति-मात्राः पूर्वार्द्धे उत्तरार्द्धे च प्रत्येकं पतंति, तद्गाहूनामकं छंद-इति निर्गलितार्थः। (E).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

जह्म, चंदो चंदण[1] हारो ताबअ[2] रूअं[3] पआसंति[4] ।
चंडेसरबर कित्ती[5] जाब ण अप्पं णिदंसेइ[6] ॥ ५३[7] ॥
गाह्म ।

---

५२ । अथ गाह्म ॥ पूर्वार्धे उत्तरार्धे सप्ताधिका मात्रा विंशतिः । षष्ठो गणः पदमध्ये गाह्म भेदः एव युगलाप्यः ॥ युगे द्वे ४ [?] द्वये । संपूर्णपद्यमध्ये षष्ठएव भेदः कार्यो नान्यत्रेति भावः ॥ ५२ ॥ (G).

५३ । चन्द्रश्चन्दनं हारस्तावद्रूपं प्रकाशयन्ति । चण्डीश्वरवर-कीर्त्तिर्यावन्नात्मानं निदर्शयति ॥ तत्कीर्त्यग्रे तेषां निष्प्रभलमिति व्यज्यते । (C).

५३ । गाह्ममुदाहरति, चंदो इति । चंद्रः चंदनं हारो मुक्ता-दाम, एते तावद् रूपं स्वकांतिं प्रकाशयंति । चंडेश्वरवरकीर्त्तिः जाब — यावत्, अप्पं — आत्मानं स्वं, न [ण] णिअंसेइ — न निदर्शयति प्रकटयति ॥ (E).

५३ । यथा चंद्रस्चंदनं हारस्तावद्रूपं प्रकाशयति । चंडेश्वरस्य वरा कीर्त्तिर्यावदात्मानं न दर्शयति ॥ ततोऽपि कीर्त्तिर्धवले-त्यर्थः । ५३ ॥ (G).

---

५३ । १ चंदो चंदण (B & C). २ तावइ (A), ताव (D). ३ रूअ (B). ४ पअसंति (D), पआसेइ (F). ५ कित्ति (A). ६ जावन्न अप्पं निदंसेइ (B), जाव अप्पं ण दंसेइ (D), जाव ण अप्पं णिअंसेइ (E), जाव अप्पाणं ण दंसेइ (F). ७ ५६ (F), ५९ (A).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अथ गाहा । (F).

पढ़मं बारह मत्ता बीए अट्ठारहेहिँ[१] संजुत्ता ।
जह पढ़मं तह तीअं दहपंचविहूसिआ[२] गाहा ॥ ५४[३] ॥

---

५४ । गाथामाह । प्रथमे द्वादश मात्रा द्वितीयेऽष्टादशभिः संयुक्ता । यथा प्रथमं तथा तृतीयं दशपञ्चविभूषिता गाथा ॥ पञ्चदशेति — अर्थाच्चतुर्थचरणे पञ्चदशमात्राभूषिता भवतीत्यर्थः ॥ (C).

५४ । अथ गाथां लक्षयति पढ़मभिति । यत्र पढमं — प्रथममाद्यचरणे इत्यर्थः, बारह मत्ता — द्वादशमात्राः पतंतीति शेषः, या च बीए — द्वितीये चरणे इत्यर्थः, अट्ठारहेहिं — अष्टादशभिः मात्राभिरिति शेषः, संजुत्ता — संयुक्ता । यस्यास्तु जह पढ़मं तह तीअं — यथा प्रथमस्तथा तृतीयः चरण इति शेषः, द्वादशमात्रायुक्त इत्यर्थः, या च चतुर्थे चरणे इति शेषः, दहपंचविहूसिआ — पंचदशभिर्मात्राभिरिति शेषः विभूषिता, सा गाहा गाथानामकं छंद इत्यर्थः । (E).

५४ । अथ गाथा ॥ पढ ॥ प्रथमो द्वादशमात्रो, द्वितीयोऽष्टादशभिः संयुक्तः । यथा प्रथमस्तथा तृतीयो दशपंचविभूषिता गाथा ॥ चरण इति शेषः ॥ चतुर्थः पंचदशमात्र इत्यर्थः ॥ [पथ्या] आर्येयं संस्कृते ॥ ५४ ॥ (G).

---

५४ । १ अट्ठारएहि (A), अट्ठारहेइ (C), अट्ठारहेहि (D & E), अट्ठारहेहिं (F). २ विऊसिआ (D). ३ ५२ (A), ५४ (E & F).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

जहा, जेण बिणा ण जिविज्जइ[1]
अणुणिज्जइ सो कआबराहोबि[2] ।
पत्ते बि णअरडाहे[3]
भण[4] कस्स ण बल्लहो[5] अग्गी[6] ॥ ५५[7] ॥ गाहा ।

---

५५ । येन विना न जीव्यतेऽनुनीयते स कृतापराधोऽपि । प्राप्तेऽपि नगरदाहे भण कस[्य न] वल्लभोऽग्निः ॥ नगरदाहकोऽप्यग्निरावश्यकत्वात् प्रिय एवेति ॥ (C).

५५ । गाथामुदाहरति जेणेति । येन [जेण] बिणा ण जिविज्जइ — येन विना न जीव्यते सः कआबराहोबि — कृतापराधोऽपि, अणुणिज्जइ — अनुनीयते । एनमेवार्थमर्थांतरन्यासेन द्रढ़यति पत्ते बीति । पत्ते बि — प्राप्तेऽपि, णअरडाहे — नगरदाहे, अग्गी — अग्निः, कस्स ण बल्लहो — कस्य न वल्लभ इति भण — वद, अपि तु सर्वस्यापि वल्लभ इत्यर्थः । मानवतीं कांचिन्नायिकां प्रति सखीवाक्यमेतत् । अयं च वक्ष्यमाणभेदेषु चूर्णानामको [Vide sloka 60 P. 114] दशमो भेद इति बोध्यम् ॥ (E).

५५ । यथा ॥ जेणेति ॥ येन विना न जीव्यतेऽनुनीयते स कृतापराधोऽपि । प्राप्तेऽपि नगरदाहे भण कस्य न वल्लभोऽग्निः ॥ ५५ ॥ (G).

---

५५ । १ जिवज्जइ (B & C). २ कवराहो (D). ३ णअरडाहे (F). ४ भणि (E). ५ वल्लभो (B & C). ६ अग्गि (A). ७ ५२ (A), ५५ (E & F).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

सत्तगणा दीहंता[1] जो णलहू[2] छट्ठ णेह जो बिसमे[3] ।
तह गाहे बिअ अद्धे छट्टं लहुअं बिआणेहु ॥ ५६[4] ॥

---

५६ । इदानीं गाथायां विशेषान्तरमाह, सप्तगणा दीर्घान्ता यो-[जो] नलघुः षष्ठः, नेजाजा[नेह जो] विषमे ; तथा गाथायां द्वितीयार्द्धे षष्ठं लघुकं विजानीहि ॥ अत्र चतुष्कलो गणः । पूर्व्वार्द्धे तादृशाः सप्तगणाः कार्य्याः, अन्ते दीर्घो गुरुः कार्य्यः, जगणो [न]लघुर्वा षष्ठोगणः कार्य्यः ॥ इह गाथायां विषमे एकादौ जगणो न देयः । (C).

५६ । अथ गाथायां मात्रानियममुक्त्वा गणनियममाह सत्तेति । गाहे — गाथायां, सत्तगणा दीहंता — सप्तगणाः दीर्घांताः दीर्घो-गुरुस्तदंताः भवंति । अत्र विशेषपरोऽपि दीर्घशब्दः सामान्यगुरु-परो ज्ञेयः, एवं च पूर्वार्द्धे उत्तरार्द्धे च गुर्व्वंताश्चतुर्मात्रिकाः सप्त-गणाः कर्त्तव्या इत्यर्थः, इह इत्यग्रेतनस्यानुकर्षः, इह गाथायां छट्ठ — षष्ठः गणः, जो णलहू — जो जगणः गुरुमध्यः, नलघू लघुयुक्तो नगणो वा भवति, कर्त्तव्येषु गुर्व्वंतसप्तगणेषु षष्ठो जगणश्चतुष्कलः [?] नगणो वा देय इत्यर्थः । णेह जो बिसमे — इह गाथायां विषमे [प्रथमे] तृतीये पंचमे सप्तमे च स्थाने इत्यर्थः, यो [जो] जगणो गुरुमध्यो न पततीत्यर्थः, तह — तथा, बिअ अद्धे — द्वितीयार्द्धे छट्टं लहुअं बिआणेहु — षष्ठं गणं लघुकम् एक-लघुरूपं विजानीत, एवं च पूर्वं नलघुजगणयोरन्यतरदानं पूर्वा-

---

५६ । १ दीहान्ता (B & C). २ णलहु (E). ३ विषमे (B & C).
४ ५४ (A), ५६ (E & F).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

सव्वाए गाहाए सत्तावस्साइं[1] होंति[2] मत्ताइं[3] ।
पुव्वद्धम्मि[4] अ तीसा सत्ताईसा[5] परद्धम्मि[6] ॥ ५७[7] ॥ गाहा ।

द्धाभिप्रायेणेति प्रतीयते, तथा च मध्यलघु[गुरु]गणः लघुसंयुक्तो-नगणस्त्रिलघ्वात्मको वा लगणः पूर्वार्द्धे षष्ठे विधेयः, उत्तरार्द्धे च एकलघ्वात्मक एव षष्ठोगणो विधेय इति भावः । (E).

५६ । सत्तेति । सप्तगणा दीर्घांता जगणो नलघू षष्ठो नेह जो विषमे । तथा गाथायां द्वितीयार्द्धे षष्ठं लघुकं विजानीत ॥ प्रथमार्द्धे त्रिंशन्मात्राः तत्र षष्ठो जगणो नलघू वा कार्यौ, विषमे स्थाने द्वितीयचतुर्थादौ [प्रथमतृतीयादौ] जगणो न कार्यः । द्वितीये षष्ठो लघुरेव कार्यः, शेषे पूर्वा [?] ॥ ५६ । (G).

५७ । पढ़मं बारह मत्तेत्यनेन उक्तमर्थं स्पष्टीकर्त्तुमाह । सर्व्वस्यां गाथायां सप्तपंचाशद्भवन्ति मात्राः । पूर्व्वार्द्धे च त्रिंशत् सप्तविंशतिः परार्द्धे । सप्तपञ्चाशतो विभागमाह पूव्वद्ध इत्यादिना । केचित्तु श्लोकोऽयं काल्पनिक इति मन्यन्ते, परे तु द्विपद्यपि गाथा भवतीति बोधयितुं पुनरिदमुक्तम् । (C).

५७ । अथ गाथायां वर्त्तमानषड्विंशतिविधायां समुदितमात्रानियममाह, सव्वाए इति । पुव्वद्धम्मि अ तीसा — पूर्वार्द्धे त्रिंशत् परार्द्धे उत्तरार्द्धे इत्यर्थः, सत्ताईसा — सप्तविंशतिः । एवं प्रकारेण

---

५७ । १ सत्तावणाइं (A & B), सत्तावणाइं (D). २ होंति (D). ३ मत्ताए (C), मत्ताईं (D). ४ पूर्व्वद्धम्मि (B), पूव्वद्धम्मि (C). ५ सत्ताइसा (A). ६ परद्धाए (A), पच्छद्धाए (B & C). ७ ५५ (A), ५७ (E & F).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

सत्ताईसा[१] हारा[२] सल्ला जस्सम्मि[३] तिम्नि[४] रेहाई[५] ।
सा गाहाणं गाहा आश्रा तीसक्खरा[६] लच्छी[७] ॥ ५८[८] ॥

सव्वाए गाहाए — सर्वस्यां गाथायां सत्तावरमाइ — सप्तपंचाशत् मत्ताइं — मात्राः होंति — भवंतीत्यर्थः । पूर्वार्धे षष्ठे चतुर्मात्रिकस्य जगणस्य लघुयुक्तनगणस्य वा दानात्त्रिंशन्मात्राः पतंति, उत्तरार्द्धे च षष्ठस्थाने एकलघ्वात्मकस्यैव गणस्य दानात्तदपेक्षया मात्रात्रयं न्यूनं भवंतीति सप्तविंशतिमात्राः पतंतीत्यर्थः । (E).

५७ । सव्वेति । सर्वस्या गाथायाः सप्तपंचाशद्भवंति मात्राः ॥ पूर्वार्द्धे च त्रिंशत् सप्तविंशतिः परार्द्धे च ॥ ५७ ॥ (G).

५८ । अथ गाथाभेदानाह । सप्तविंशतिर्हाराः, शल्यानि यस्यां त्रीणि राजन्ते । सा गाथानां गाथा आयाता त्रिंशदक्षरा लक्ष्मीः ॥ हारा गुरवः, शल्यानि लघवः, देवानां देव इतिवद्गाथानां गाथेति प्रकर्षार्थमुच्यते ॥ (C).

५८ । अथानुपदमेव वक्ष्यमाणेषु भेदेषु प्रथमं भेदं लक्ष्मी-नामकं लक्षयति सत्ताइसेति । जस्सम्मि — यस्यां, सल्ला — श्ला-[श्ला]घ्याः सत्ताइसा हाराः — सप्तविंशतिर्दीर्घाः गुरव इत्यर्थः, तिम्नि रेहाइं — तिस्रो रेखा लघवस्त्रित्यर्थः, पतंतीति शेषः, सा गाहाणं — गाथानां मध्ये, आश्रा — आद्या प्रथमेति यावत्, तीसक्खरा —

---

५८ । १ सत्ताइसा (A & E). २ हास (E). ३ जस्सम्म (C). ४ तिमि (F). ५ रेहाइं (A & E), रेहेइं (B), रेहेइ (C), रेहोइं (F). ६ तीसक्खरा (A, B & D). ७ लच्छी (A, D & E). ८ ५९ (A), ५८ (E & F).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

तीसक्खरा हि[1] लच्छी[2]
सव्वे[3] बंदंति[4] होइ[5] बिक्खाआ[6] ।
हासइ[7] एक्कं एक्कं[8]
बंकं[9] ता कुणह[10] णामाइं[11] ॥ ५९[12] ॥ [गाहा]

त्रिंशदक्षरा, लच्छी—लक्ष्मीः, गाहा—गाथा, सा लक्ष्मीनाम्नी गाथेत्यर्थः । अयमर्थः—पूर्वं गाथायाः प्रथमचरणे द्वादशमात्रादानमुक्तं, तासां च षड्गुरवो भवंति, द्वितीयचरणे अष्टादशमात्रादानमुक्तं, तत्र षष्ठस्थानपतितजगणाद्यंतस्थलघुद्वयवर्जनात्तासामष्टौ गुरवो भवंतीति पूर्वार्द्धे चतुर्दश गुरवः, एवं तृतीयेऽपि चरणे द्वादशमात्रादानस्योक्तत्वात्तासां षगुरुदः [षड्गुरवः], चतुर्थे च पंचदशमात्रादानस्योक्तत्वात्तत्र षष्ठस्थानपतितैकलघ्वात्मकगणवर्जनात्तासां सप्त गुरवः, इति उत्तरार्द्धे त्रयोदश गुरवः, एवं पूर्वार्द्धोत्तरार्द्धयोस्संकलने सप्तविंशतिर्गुरवः, पूर्वार्द्धजगणाद्यंतस्थौ द्वौ लघू, उत्तरार्द्धे च षष्ठस्थैकलघुरेवं त्रयो लघवस्सेति त्रिंशदक्षराणि यत्र पतंति सा लक्ष्मीनाम्नी गाथेत्यर्थः । ५८ । (E).

५८ । अथ गाथाभेदेषु लक्ष्मीनाम्नीं गाथामाह ॥ सत्तेति ॥ सप्तविंशतिर्हाराः श्लाघ्या यस्यां त्रयः [तिस्रो] रेखाः । सा गाथानां

५९ । १ तीसक्खरा हिं (D), तीसचरा हिँ (E). २ लच्छो (A & D), लच्ची (E). ३ सेव्वे (E). ४ वण्णन्ति (C), वदंति (E & F). ५ होअइ (F). ६ विख्खाआ (E). ७ होसइ (A), होसइ (B & C). ८ Once only in (F). ९ वणं (A), वक्कंथ (C). १० कुणऊ (A). ११ नामाइ (B, C & D). १२ ५७ (A), ५९ (F).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

लच्छी[1] रिद्धी[2] बुद्धी[3]
लज्जा[4] बिज्जा क्खमा[5] अ देहीआ[6] ।
गोरी धाई[7] चुसा[8]
छाआ[9] कांती[10] महामाई[11] ॥ ६०[12] ॥ [लक्ष्मी]

गाथा आद्या त्रिंशदक्षरा लक्ष्मीः ॥ हारो गुरुः, रेखा लघुः ॥ तत्र पूर्वार्द्धे चतुर्दश गुरवः षष्ठजगणस्थलघुद्वयं च, उत्तरार्द्धे त्रयोदश गुरवः षष्ठस्थैकलघुश्चेति सप्तविंशतिर्गुरवो लघुत्रयं चेति फलति त्रिंशदक्षरेति ॥ ५८ ॥ (G).

५९ । त्रिंशदक्षरलक्ष्मीः सर्व्वे वदन्ति भवति विख्याता । ह्रसैक-मेकं वक्रं तत्कुरुते नामानि ॥ कुरुते अर्थात् पिङ्गलः । (C).

५९ । अथ लक्ष्मीनाम्नीं गाथां स्तौति तीसेति । बिख्खाआ— विख्याता, हासइ—ह्रसति, वंकं—वक्रं, गुरुरित्यर्थः । एकैकस्य गुरोर्ह्रासेन लघुद्वयवृद्धिर्बोद्धव्या, अन्यथा [सप्त]पंचाशन्मात्राणां नैयत्यं न स्यात् । तासां करोति नामानि, एकैकगुरोर्ह्रासे लघुद्वय-[यु]क्तस्य च वृद्धौ ये भेदास्तेषां नामानि करोतीत्यर्थः । (E).

५९ । तीसेति ॥ त्रिंशदक्षरैर्लक्ष्मीः सर्वे वदंति भवति विख्याता ।

---

६० । १ ता लच्छी (A), ता लच्छी (B & C), लच्छी (D & F), लच्चौ (E). २ रिद्धी (B, D, E & F). ३ Omitted in (C). ४ लज्जे (D). ५ खम्मा (A), खमआ (B & C), ख्खमआ (E), क्खमआ (F). ६ देवी (B & C). ७ धाइ (B), राइ (C), राई (E). ८ पुसा (C). ९ च्छआ (C). १० कत्ती (A & D), कन्ती (C). ११ माहामाईआ (A), महामाआ (B), माहामाआ (C). महामाईआ (E). १२ ५७ (A), ६० (F).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

किती[1] सिद्धी[2] माणी[3]
रामा[4] गाहिणि[5] बिसाअ[6] बासीआ[7] ।
सोहा हरिणी[8] चक्की
सारसि[9] कुररी सिहीअ[10] हंसीआ[11] ॥ ६१[12] ॥
[उग्गाहा]

ह्रसत्येक एको गुरुस्तदा कुरुते नामानि ॥ अत्र सप्तविंशतिगुरूणां क्रमादेकैकह्रासे सप्तविंशति [?] नामानि भवंतीत्यर्थः ॥ ५९ ॥ (G).

As there must be at least one long syllable at the end of each half (गुर्वन्तेति), there cannot be more than 26 varieties in all. This has been fully discussed in commentary (E), vide p. 116.—Ed.

६० & ६१ । नामान्येवाह, ता लच्छी । लक्ष्मीर्ऋद्धिर्लज्जा विद्या क्षमा देवी । गौरी रात्रिः पूर्णा छाया कान्तिः महामाया ॥ कीर्त्तिः सिद्धा मनोरमा गाहिनी विश्वा वासिता । शोभा हरिणी चक्री सारसी कुररी सिंही हंसी मिलित्वा षड्विंशतिनामानि । (C).

६० & ६१ । लच्चीति । क्रमानुरोधात्पुनरुपात्तं । खमआ — क्षमा, देही — देवी, राई — रात्रिः, चुण्णा — चूर्णा, महामारी । मनोरमा विश्वावसिता । शोभा । तेन षड्विंशतिनामानि, भेदानामपि तावन्मात्रलात् । तथाहि, सप्तविंशतिरेव ग्रहायां गुरवो न त्वधिकाः, तत्रांतिमौ नियतौ, एवं चावशिष्टपंचविंशतिगुरूणां

६१ । १ किति (F). २ सिद्धा (B & C). ३ माणी (A), मणो (C), माणिणी (F). ४ रमा (B). ५ गाहिणी (B, C & E), गाहीणि (D). ६ बीसा (A, B, C & E), विस्सा (F). ७ वासिआ (C). ८ Omitted in (C). ९ सारसी (A). १० सिंही (A), सीही (B & C), सिंहीअ (D). ११ हंसि (B). १२ ५८ (A), ६१ (F).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

भिद्यमानानां पंचविंशतिर्भेदाः, एकस्य सर्वगुरुक इति षड्विंशति-रेव भेदाः । एतेन पादांत्यस्य मात्रापूरणनिर्वाहाय गुरुत्वापादनेऽपि वस्तुगत्या लघुत्वादष्टाविंशतिर्भेदाः इत्यसंधाय मानिनी रमा विश्वा वसितेति अष्टाविंशतिनामानि वदन्तः परास्ताः ।

अत्र प्रथमो भेदो जगणमेवावलंब्य ततो द्वितीयादयस्तु-विंशतिर्भेदाः षष्ठे जगणनलघ्वात्मकगणान्यतरदानमवलंब्य बोध्याः, अंतस्तु षष्ठे नलघुमेवावलंब्येति हृदयम् । यत्तु माणी रामेति नामद्वयं विधाय एकगुरुपंचपंचाशल्लघ्वात्मकः सप्तविंशतितमो भेदः कैश्चित्स्वीकृतस्तदनवधानात् । तथाहि यदि षष्ठे जगणो दीयते तदा जगणमध्यस्य एको गुरुर्द्दलद्वयांतस्थं च गुरुद्वयमावश्यकमिति एको गुरुर्न संभवत्येव, यदि च षष्ठे नलघ्वात्मकगणो दीयते तदापि दलद्वयांतस्थगुरुद्वयस्यावश्यकत्वादेको गुरुर्न संभवत्येवेति षड्विंशतिरेव भेदा न सप्तविंशतिरिति सुधीभिर्विभावनीयम् । यदपि माणीरामेति एकं नाम विधाय गाहिनीति नाम लेखक-प्रमादात्पतितमिति, लक्ष्म्याद्यास्त्रिगुर्वे[क]पंचाशल्लघ्वात्मकांत्याः पंच-विंशतिरेव भेदा नाम न च तु षड्विंशतिरिति,— तदप्यनवधान-निबंधनं, यतः षष्ठे नलघुरूपगणदानेनांत्ये चावश्यकगुरुद्वयदानेन निराबाधं संभवतो द्विगुरु त्रिपंचाशल्लघ्वात्मकस्य षड्विंशतितमस्य भेदस्य त्यागो नौचित्यमावहतीत्यलमतिविस्तरेणेत्यस्मत्तातचरणोप-दिष्टः पंथाः सुधीभिर्विभावनीयः । (E).

६० & ६१ । लक्ष्मीति ॥ लक्ष्मीः १, ऋद्धिः २, बुद्धिः ३, लज्जा ४, विद्या ५, क्षमा ६, देवी ७, गौरी ८, धात्री ९, चूर्णा १०, छाया ११,

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

पढमं चौ[1] हंसपत्रं
बीए सिंहस्स[2] विक्कमं जाआ[3]।
तीए गअवर[4] लुलिअं
अहिबर[5] लुलिअं[6] चउत्थए[7] गाहा ॥ ६२[8]।

उग्गाहा।

कांतिः १२, महामाया १३, कीर्त्तिः १४, सिद्धिः १५, मानिनी १६, रामा १७, गाहिनी १८, विश्वा १९, वासिता २०, शोभा २१, हरिणी २२, चक्री २३, सारसी २४, कुररी २५, सिंही २६, हंसी २७ एतानि क्रमान्नामानीत्यर्थः ॥ ६१ ॥ (G).

६२। पाठे क्रमं दर्शयति। प्रथममेव हंसप्प[प]दं द्वितीये सिंहस्य विक्रमं जाता। तृतीये गजवरललितम्, अहिललितं चतुर्थके गाथा ॥ [चौ]शब्द एवार्थे, गाथायाः प्रथमपादं प्राप्य हंसगमनवल्लितं पद्यत इत्यर्थः। एवमग्रेऽपि। (C).

६२। अथ गाथापठनप्रकारमाह पढममिति। अत्र चौश[ब्द]स्त्वर्थः, तथाच पढमं चौ — प्रथमं तु, गाहा — गाथा, हंसवाश्रं [हंसपत्रं] — हंसपदं, जाआ — यथा मंथरमित्यर्थः, तथा मंथर- इति शेषः सर्वत्र योज्यः, बीए — द्वितीये चरणे, सिंहस्स विक्कमं — सिंहस्य विक्रमो यथा, तीए — तृतीये चरणे, गअवरलुलिअं —

६२। १ चौ (F). २ सीहस्स (B & C), सिंह (F). ३ जासु (E). ४ गहवर (F). ५ अहिलुलिअं (A, B, C, E & F). ६ नलिअं (C). ७ चउच्छं (A), चउत्थहे (B), चउत्था (C), चतुत्था (F). ८ ५९ (A), ६१ (E & F).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

एक्के जे कुलमंती[१]
वे णाअक्के[२] हि[३] होइ संगहिणी[४]।
णाअक[५]हीणा रंडा
वेसा बहुणाअका होइ[६] ॥ ६३[७] ॥ गाहा।

गजवरलुलितं गजेंद्रगमनमित्यर्थः यथा, चउत्थए—चतुर्थे चरणे, अहिलुलिअं—अहिलुलितं सर्पगतिविशेष इति यावत् यथा। (E).

६२। अथ पठनरीतिमाह॥ पढेति॥ प्रथमेऽंघ्रौ हंसपदं द्वितीये सिं[हस्य] विक्रमं याता। तृतीये गजवरलुलितं, अहिलुलितं चतुर्थे गाथा॥ हंसादिगमनवत् क्रमाच्चरणाः पठनीया-इत्यर्थः॥ ६२॥ (G).

६३। गाथायां जगणात्प्रसं[शं]सामाह, एकस्मिन् जे कुलवती, द्वाभ्यां नायकाभ्यां भवति संगृहीता। नायकहीना रण्डा, वेश्या ये [या] बहुनायका भवति॥ नायको जगणः, संगृहीता पुनर्भूः। इह कुलवतीवत् एकजगणवती गाथा प्रशंस्या इत्यर्थः। (C).

६३। अथ समस्थानेऽपि जगणदाने गाथायां गुणदोषावाह—एक्के जे इति। एक्के जे कुलवंती—एकस्मिन् जगणे सति कुलवती होइ—भवति गाथेति शेषः। यथोक्तषष्ठस्थानस्थजगणमात्रेण समीचीना गाथा भवतीति, तदतिरिक्तो जगणः समस्थानेऽपि न कर्त्तव्य इति भावः। वे णाअक्केण—द्विनायकाभ्यां द्वाभ्यां जग-

---

६३। १ कुलवंती (E). २ णाए (A). ३ ण (A), हो॑ (B), हिँ (C), हिं (E). ४ संगहणी (A & E). ५ णाअक (E). ६ होई (F). ७ ६० (A), ६२ (E & F).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

तेरह लहुआ बिप्पी[1] एआईसेहि[2] खत्तिणी भणिआ।
सत्ताईसा[3] वेशी सेसा सा सुद्दिणी होइ[4] ॥ ६४[5] ॥ गाहा।

णाभ्यामिति यावत्, संगहणी—संग्टहिणी भवतीति पूर्वेणा-न्वयः, यथा द्वाभ्यां नायकाभ्यां परस्परं गृहीता कामिनी न सतां संमता तथेयमपीति, जगणद्वयमत्र न देयमी[मि]ति भावः। णाअकहीना[णा] रंडा—नायकेन जगणेन हीना रहिता, षष्ठे स्थाने नलघुयुक्तेत्यर्थः रंडेव रंडेत्यर्थः, तथाच यथा नायकेन हीना कामिनी न शोभते तथेयमपीति, बहुधा षष्ठो जगण एव देय इति भावः। बहुणाअका [का]—बहुनायका बहवो नायका-जगणा यस्याः सा तादृशीत्यर्थः, वेश्या होइ—भवति, तथाच यथा वेश्या सतामनादरणीया तथेयमपि[पी]ती[ति] बहवो जगणा न देया इति भावः। (E).

६३। विषमस्थाने जगणदोषमाह॥ एक्के॥ एकेन जगणेन कुलवती द्वाभ्यां नायकाभ्यां भवति संग्रहणी। नायकहीना रंडा वेश्या सा बहुनायका भवति॥ जेन षष्ठस्थानस्थेनैवेत्यर्थः॥ संग्रहणी व्यभिचारिणी॥ तासां यथा सदोषत्वं तथेत्यर्थः॥ ६३॥ (G).

६४। गाथाया जातिमाह। त्रयोदशलघुका विप्रा, एकविंशत्या [क्षत्रिया भणिता। सप्तविंशत्या] वैश्या शेषैः [सा] शूद्रा भवति॥ एकविंशत्या सप्तविंशत्या इत्यत्र लघुभिरिति पूरणीयम्। (C).

६४। १ विप्पा (F). २ एआईसेइँ (C), एआइसेहिं (D & E), वीसेहि (F). ३ सत्ताईसे (A & E). ४ होई (F). ५ ६१ (A), ६४ (E & F).

CC-0. In Public Domain. Funding by IKS-MoE

जा पढम तीत्र पंचम
सत्तम ठाणे[1] ण[2] होइ गुरुमज्झा ।
गुव्विणिए[3] गुणरहित्रा
गाहा दोसं पत्रासेइ ॥ ६५[4] ॥ गाहा ।

---

६४ । अथ[य] वर्णभेदेन प्रा[गा]थाया जातिभेदमाह तेरहेति । तेरह लहुआ — त्रयोदशलघुकाक्षराख्या गाथेत्यर्थः सर्वत्र योज्यं, विप्पी — विप्रा भवतीति शेषः, एआइसेहिं — एकचत्वारिंशद्भिरेकविंशद्भिर्वेत्यर्थः लघुभिरिति शेषः खत्तिणी — क्षत्रिया भणिता । सत्ताईसे — सप्तविंशतिभिर्लघुभिर्वेसी — वैश्या भणितेति पूर्वेणान्वयः, सेसा — शेषा, अनुक्तलघुसंख्याका सुद्दिणी होइ — शूद्रा भवतीत्यर्थः । (E).

६४ । प्रकारांतरेण भेदमाह ॥ तेरह ॥ त्रयोदशभिर्लघुभिर्विप्रा एकविंशैः क्षत्रिया भणिता । सप्तविंशैर्वैश्या शेषैः सा शूद्रिणी भवति ॥ अत्रेदमवधेयम् ॥ श्रेष्ठार्यया हीनवर्णं वर्णयेद्यस्तु मूढधीः । उभयोर्जायते नाशस्तृतीयः सुखमेधते ॥ ६४ ॥ (G).

६५ । विषमस्थजगणाया निन्दामाह । या गाथा प्रथमादिस्थाने गुरुमध्ययुक्ता भवति, सा गुर्विणीत्युच्यते । अत्र गुणरहितत्वं सदोषत्वं शत्रुमित्रादियोगवदिति । (C).

---

६५ । १ ठाणे (A). २ Omitted in (C & F). ३ गुव्विणिआ (A), गुव्विणिव्व (F). ४ ६१ (A), ६५ (E & F).

Digitized by eGangotri and Sarayu Trust.
CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अथ बिग्गाहा । (D & F).

बिग्गाहा पढम दले
सत्ताईसाइँ[1] मत्ताइँ[2] ।
पच्छिम[3] दले ण[4] तीसा
इअ[5] जंपिअ[6] पिंगलेण णाएण ॥ ६६[7] ॥

६५। अथ विषमस्थानस्थजगणदोषमाह, जा इति। जा पढम तीअ पंचम सत्तम ठाणे—या प्रथमे तृतीये पंचमे सप्तमे च स्थाने, ण—ननु निश्चयेनेति यावत्, गुरुमज्झा—गुरुमध्यो-जगणस्तद्युक्तेति यावत्, होइ—भवति, सा गाहा—गाथा गुण-रहिता, गुब्बिणिए—गुर्विणीव दोषं प्रकाशयति। तथाच विषमे गाथायां जगणो न देय इति भावः। (E).

६५। जा पेति ॥ या प्रथम-तृतीय-पंचम-सप्तम-स्थाने[षु] भवति गुरुमध्या। गुर्विणीव गुणरहिता गाहा[था] दोषं प्रकाशयति ॥ गुरुमध्यो जगणः ॥ ६५ ॥ (G).

६६। विगाथा-प्रथमदले सप्तविंशतिमात्राः। पश्चिमदले चिंश-दिति जल्पितं पिंगलनागेन॥ प्रथमपादे मात्रा द्वादश द्वितीये पञ्चदश इति सप्तविंशतिस्तृतीये द्वादश चतुर्थे चाष्टादश इति

६६। १ सत्ताईसाइं (A & E), सत्ताइसाइ (C), सत्ताइसाई (D). २ मत्ताइं (A & E), मत्ताइ (C), मत्ताई (D). ३ पच्छिम (A & D), पश्चिम (C). ४ Omitted in (F). ५ इम (E), ईएम (F). ६ जंपिचं (A), जप्पिअ (B), जम्पिअ (C), जंथिअ (D). ७ ६२ (A), ६६ (E & F).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

जहा, परिहर माणिणि माणं
पेक्खहि[1] कुसुमाइँ[2] णीवस्स[3] ।
तुम्ह[4] कए[5] खर[6] हिअओ[7]
गेह्लइ[8] गुडिआ[9] धणुंहि[10] किल[11] कामो ॥ ६७[12] ॥
बिग्गाहा ।

त्रिंशत् । अत्र प्रथमार्द्धे एकलघुकः षष्ठो गणः, द्वितीयार्द्धे षष्ठो-जगणो नलघुर्वेति सप्त गणा दीहान्ता इति न व्यभिचरति, तेन पूर्वापरार्द्धव्यत्यासेन विगाथा भवतीति फलितार्थः । (C).

६६ । अथ विगाथां लक्षयति बिग्गाहेति । बिग्गाहा पढम दले — विगाथा-प्रथमदले पूर्वार्द्धे इति यावत्, सत्ताईसाइं मत्ताइं — सप्तविंशतिर्मात्राः भवंतीति शेषः, पच्छिमदले — पश्चिम-दले उत्तरार्द्धे इत्यर्थः, ण — ननु निश्चयेनेत्यर्थः, ति[तो]सा — त्रिंशन्मात्रा भवंतीति पूर्वेणान्वयः, इअ — एवं पिंगलेन नागेन जंपिअ — जल्पितम् ॥ अयं भावः । पूर्वं विपरीतगाथा विगाथा भवतीत्युक्तं, तथाच गाथा[या] उत्तरार्द्धम् एव पूर्वार्द्धम् अग्रे देयमित्युक्तं भवति, अतएव पूर्वार्द्धे सप्तविंशतिर्मात्रा उत्तरार्द्धे

---

६७ । १ पेक्खइ (B & C), पेक्खहिं (F). २ कुसुमाइ (B), कुसुमाई (D), कुसुमाइं (E & F). ३ णीपस्स (B), णिंवस्स (F). ४ तुम्ह (A & D), तुम्मु (B), तुम (C), तुज्झ (E). ५ कए (C). ६ क्खर (A), रह (D). ७ हिओ (A & E), हिअ (D). ८ गेण्हइ (B), गेड्डइ (C), गेण्हइ (D). ९ गुलिआ (B), गुणिआ (C), गुटिका (F). १० धणूँहि (A), धनुहिं (B), धणइँ (C), धणुं (D), धणुहि (E). ११ कर (A), किर (D). १२ ६४ (A), ६७ (E & F).

6338.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

त्रिंशन्मात्रा उक्ताः, एवं चात्रापि पूर्वार्द्धे षष्ठो गण एकलघ्वात्मको देय उत्तरार्द्धे च षष्ठो गणो जगणो नलघ्वात्मको वा देयः, विषमे च जगणो न देय एवेति सुधीभिर्बोध्यम् । (E).

६६ । अथ बिगाहामाह ॥ बिग्गेति ॥ बिग्गा[गा]थायाः प्रथम-दले सप्तविंशतिर्मात्राः । पश्चिमदले त्रिंशत् एवं जल्पितं पिंगलेन नागेन ॥ ६६ ॥ (G).

६७ । उदाहरति । परिहर मानिनि मानं प्रेच[ख] कुसुमानि नीपस्य । तव कृते खरहृदयो गृह्लाति गुटिकां धनुषि कामः ॥ खरहृदयस्तीक्ष्णहृदयः कदम्बकुसुमव्याजेन गुटिकाः कामो धनुषि गृह्लाति ॥ (C).

६७ । विगाथामुदाहरति परिहरेति । णीबस्स—नीपस्य कदम्बस्य कुसुमानि पेक्खहि—प्रेचस्व । किं तावभे[ते]त्यत आह तुज्झ कए इति । खरहिअओ—कठिनहृदयो निर्दय इति यावत् कामो—कामः, धणुहि—धनुषि, गुडिआ—गुटिकां, यद्वा गुडिआधनूहि इत्येकं पदं, तस्य वटिकाधनुः गुटिका-युक्तां[क्तं] धनुरित्यर्थः । गुलेलेल इति लोके; गेन्ह[ह्ल]इ—गृह्ला-[ह्ला]ति, अतो मानं परिहरेत्यर्थः ॥ (E).

६७ । यथा, परिहर मानिनि मानं प्रेचस्व कुसुमानि नीपस्य । युष्मत्कृते खरहृदयो गृह्लाति गुटिका धनुषि किल कामः ॥ कदंबपुष्पगुटिकाः कामो धनुषि योजयतीत्यर्थः ॥ किलेति निश्चये ॥ ६७ ॥ (G).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अथोद्गाथा । (D), अथोग्गाहा । (F).

पुव्बद्धे[1] उत्तद्धे[2] मत्ता[3] तीसंति[4] सुहअ[5] संभणिआ ।
सो[6] उग्गाहो[7] वुत्तो[8] पिंगल[9] कइ दिट्ठ सट्ठि मत्तंगो[10] ॥
६८[11] ॥

---

६८ । उद्गाथामाह । पूर्व्वार्द्धे उत्तरार्द्धे मात्रास्त्रिंशदिति सुभग संभणिताः । स उद्गाथा उक्तः पिङ्गलकविदृष्टः षष्टिमात्राङ्गः ॥ इयमेव गीतिरन्यैरुच्यते । [Vide Chhandah-sára-sangraha, p. 126.] हे सुभग, त्रिंशदित्युक्ता मात्रा इत्यर्थः, षष्टिमात्रा अङ्गं यस्य । (C).

६८ । उद्गाथां लक्षयति पुव्बद्धे इति । यत्र पु[व्ब]द्धे उत्तद्धे—पूर्वार्द्धे उत्तरार्द्धे मत्ता तिसत्ति—मात्राः त्रिंशत् संभणिआ—संभणिताः, हे तु[सु]भग शिष्य । सो—तत् पिंगल कइ दि-च[ट्ठ]—पिंगलकविना दृष्टं, सट्ठि मत्तंगो—षष्टिमात्रांगं षष्टि-मात्रात्मकशरीरमित्यर्थः, उग्गाहो वुत्तो—शुग्दा[उद्गा]थावृत्तम् । गाथापूर्वार्द्धं दलद्वयेऽपि देयमिति भावः । (E).

६८ । अथोद्गाथामाह ॥ पुव्बद्धेति ॥ पूर्वार्द्धे उत्तरार्द्धे मात्राः त्रिंशत् सुभग संभणिताः । तदुद्गाथावृत्तं पिंगलकविदृष्टं षष्टि-मात्रकम् ॥ इयं गीतिः संस्कृते ॥ ६८ ॥ (G).

---

६८ । १ पूर्व्वाद्धे (C), सुव्वद्धे (E). २ उत्तराद्धे (C). ३ त्ता (D). ४ तिसत्ति (E). ५ सुभग्ग (B & C). ६ सौ (E). ७ उग्गाहा (C). ८ उत्तो (C). ९ पिंग (E). १० मत्तांगो (E). ११ ६५ (A), ६८ (E & F).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

जहा, सोउँण[1] जस्स[2] णामं
अंसू णअणाइँ[3] सुमुहि रुंधंती[4] ।
भण बीर चेइबइणो[5]
पेक्खामि[6] मुहं[7] कहं[8] जहिच्छं[9] से[10] ॥ ६९[11] ॥

उग्गाहा ।

---

६९ । उदाहरति । श्रुत्वा यस्य नाम अश्रूणि नयने सुमुखि रुन्धन्ति । भण वीर-चेदिपतेः पश्यामि वदनं कथं यथेष्टं तस्य ॥ (C).

६९ । उद्गाथामुदाहरति सोउँणेति । हे सुमुहि—सुमुखि, जस्स णामं—यस्य नाम सोउँण—श्रुत्वा अंसू—अश्रूणि कर्त्तृभूतानि णअणाइं—नयने कर्मणी रुंधेइ—रुंधंति, अतस्तस्य चेइवइणो—चेदिपतेः मुहं—मुखं जहिच्छं—यथेच्छं कहं—कथं, पेख्खामि—पश्यामि इति त्वं भण—कथय । (E).

६९ । यथा ॥ सोउ । श्रुत्वा यस्य हि नामाश्रूणि नयने सुमुखि रुंधंति । भण वीर-चेदिपतेः प्रेक्षामि मुखं कुत्र यथेच्छम् ॥ अश्रूणीति कर्तृ । नयने इति कर्म । शिशुपाले मृते तज्जाया-विलापः ॥ ६९ ॥ (G).

---

६९ । १ सोउण (B, D & F). २ जस्स हि (F). ३ णअणाइ (C), णअ-णाइं (A, D, E & F). ४ रुंधन्ति (A), रुकुन्ति (C), रुद्धति (D), रुंधेइ (E). ५ इपइणो (D), चइवइचिं (F). ६ पेच्छिमे (A), पेच्छेम्मि (B), पेक्खमि (C), पेक्षामि (D). ७ वअणं (C), मुह (D). ८ कहिं (F). ९ जइच्छं (B), जहिच्छं (E), जच्चित्यं (F). १० हि (F). ११ ६६ (A), ६९ (E & F).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अथ गाहिणी सिंहिणी ।

पुव्वद्ध[1] तीस मत्ता

पिंगल[2] पभणेइ[3] मुद्धिणि[4] सुणेहि ।

उत्तद्धे बत्तीसा[5]

गाहिणि[6] विवरीअ[7] सिंहिणी[8] भणु[9] सच्चं[10] ॥ ७०[11] ॥

७० । अथ गाहिनीसिंहिन्यौ आह । पूर्व्वार्द्धे त्रिंशन्मात्राः पिंगलः प्रभणति मुग्धे शृणु । उत्तरार्द्धे [द्वा]त्रिंशद्गाहिनी विपरीतां सिंहिनीं भण सत्यं ॥ विपरीता — पूर्व्वार्द्धे द्वात्रिंशद् उत्तरार्द्धे त्रिंशन्मात्रा-यत्र सा सिंहिनी । यत्र द्वात्रिंशन्मात्रास्तत्राष्टौ गणाः कार्य्याः । (C).

७० । अथ गाहिनीं सिंहिनीं लक्षयति पुव्व इति । मुद्धिणि— हे मुग्धे यत्र पुव्वद्धे तीस मत्ता — पूर्वार्द्धे त्रिंशन्मात्रा भवंतीति शेषः, उत्तद्धे बत्तीसा — उत्तरार्द्धे द्वात्रिंशन्मात्रा भवंतीति पूर्वेणा-[न्व]यः, सा गाहिणि — गाहिणी[नी]ति पिंगल पभणेइ — पिंगलः प्रभणति त्वं सुणेहि — जानीहि, अत्र तामिति शेषः । तथाच तां गाहिनीं विवरीअ — परावर्त्य विपरीतां कृत्वेति यावत् सिंहिणी — सिंहिनीं सत्यं निस्संशयं भण — कथय ॥ अयं भावः, पूर्वं सामान्यतो गाहिन्यां द्विषष्टिमात्रा उक्तास्तत्र पूर्वार्द्धे कियत्य उत्तरार्द्धे कियत्य-इति शिष्यजिज्ञासायां पूर्वार्द्धे त्रिंशन्मात्रा उत्तरार्द्धे द्वात्रिंशन्मात्रा-

७० । १ पुव्वद्द (B), पूर्व्वद्ध (C). २ पिंगलो (F). ३ पणेहि (B), पभणेहि (C), भणइए (F). ४ मुद्दिणि (B). ५ वत्तिसा (C). ६ गाहिणी (C). ७ विअरीअ (A). ८ सींहिणी (A), सीहिणी (B), सिंहिणी (C), सिंघिणी (D). ९ भण (E). १० सव्वं (F). ११ ६७ (A), ७० (E & F).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

गाहिणी जहा,

मुंचहि सुंदरि पाअं[1]

अप्पहि[2] हसिउँण[3] सुमुहि खग्गं मे[4] ।

कप्पिअ[5] मेच्छ[6] सरीरं[7]

पेच्छइ[8] बअणाइ[9] तुमह[10] धुअ हम्मीरो[11] ॥ ७१[12] ॥

गाहिणी ।

इत्युक्तमेवं च पूर्वार्द्धे गाथाया इवास्या अपि कर्त्तव्या उत्तरार्द्धे द्वात्रिंशन्मात्राया उक्तत्वात्तत्र षष्ठं जगणं कृत्वा चतुर्मात्रिका अष्टौ गणा वक्ष्यमाणस्कंधकवत्कर्त्तव्या इति गाहिनीव्यवस्था । सिंहिन्यां च षष्ठं जगणं दत्त्वाष्टौ चतुर्मात्रिका गणाः पूर्वार्द्धे देया उत्तरार्द्धे च गाथाप्रथमदलवद्विधेयमिति निर्णय इति सुधीभिर्ध्येयम् ॥ (E).

७० । पुव्वेति । पूर्वार्धे त्रिंशन्मात्राः पिंगलो भणति हे मुग्धे शृणु । उत्तरार्धे द्वात्रिंशद् गाहिनी, विपरीतां सिंहिनीं भणंति सर्वे ॥ विपरीतां—पूर्वार्धे द्वात्रिंशदुत्तरार्द्धे त्रिंशदितिस्वरूपामित्यर्थः ॥ ७० ॥ (G).

७१ । उदाहरति, मुञ्च सुन्दरी[रि] पादम्, अर्पय हसित्वा सुमुखी[खि] खड्गमस्य । कर्त्तितम्लेच्छशरीरो द्रक्ष्यति वदनानि

---

७१ । १ पाद्दं (B). २ अप्पुहिं (D). ३ हँसिउंण (D), हसिउँणे (E), हसिअउँण (F). ४ से (C). ५ कप्पिइ (C) ६ मेछ (A, D & F). ७ सरीरो (C). ८ पेक्खिहि (A), पेक्खइ (E). ९ बअणाइं (A & F). १० तुम्ह (A & D), तुम्ह (B & F), तुहइ (E). ११ हम्मीरो (B & C), हंमेरो (E). १२ ६८ (A), ७१ (E & F).

CC-0. In Public Domain. Funding by IKS-MoE

सिंहिणी जहा,

बरिसइ[१] कणअह[२] बिट्टिं[३]

तप्पइ भुअणे[४] दिआणिसं[५] जग्गंतो ।

णीसंक साहसंको

णिंदइ[६] इंदं च[७] सूरबिंबं च[७] ॥ ७२[८] ॥ सिंहिणी ।

तव ध्रुवं हम्बीरः ॥ युद्धोद्यतो हम्बीरः पदपतितां [पत्नीं] बोधयति । वदनानीत्यादराद्बहुवचनम् । (C).

७१ । तत्र गाहिनीमुदाहरति मुंचहीति । हे सुंदरि पाअं—पादं मुंचहि—मुंच हे सुमुखि हसिऊण—हसित्वा मे—मह्यं मम वा खग्गं—खड्गं अप्पहि—अर्पय, मेच्छसरीरं—म्लेच्छशरीरं, कप्पिअ—कर्त्तयित्वा हम्मीरो—हम्मीरः तुह—तव बअणाइ—वदनं पेक्खइ—प्रेक्षते । युद्धार्थं संनद्धस्य हम्मीरस्य खड्गानयनार्थमागतवतः प्रतिबंधं कुर्वाणां कांतां प्रत्येतद्वाक्यम्, एवं च म्लेच्छान्निर्जित्य मया अक्षतेनैव झटित्यागत्य भवत्या दर्शनं विधेयम्, म्लेच्छतो वंदीभीतिर्मम वा संग्रामे मरणशंका न विधेयेति भावः । (E).

७१ । तत्र गाहिनी यथा ॥ मुंच ॥ मुंच सुंदरि पादौ अर्पय हसित्वा सुमुखि खड्गं मे । कृत्वा [कर्त्तित्वा] म्लेच्छशरीरं पश्यति वदनानि युष्माकं ध्रुवं हम्मीरः ॥ इति पत्नीं प्रति हम्मीरोक्तिः ॥ ७१ ॥ (G).

---

७२ । १ बरिसहि (B & C). २ कणअ (B). ३ दिट्ठिं (B), दिट्ठी (F). ४ भुअणे (E), भुअणेहि (F). ५ दिवाणिसं (B, C & F). ६ णिंदेइ (F). ७ अ (D). ८ ६९ (A), ७२ (E & F).

Digitized by eGangotri and Sarayu Trust.

अथ स्कंधकं। (D & F).

चउ[1]मत्ता अट्ठगणा
पुव्वद्धे[2] उत्तरद्ध[3] होइ[4] समरूआ[5]।
सा[6] खंधआ विआणहु[7]
पिंगल पभणेइ[8] मुद्धि[9] बहुसंभेआ[10] ॥ ७३[11] ॥

७२। सिंहिनीमाह ॥ वर्षति कनकवृष्टिं, तपति भुवनं दिवानिशं जाग्रत्। निःशंक-साहसाङ्को निन्दति इन्द्रं सूरविम्बञ्च ॥ इन्द्रस्य कनकवृष्ट्यभावात् सूर्यस्य च दिवानिशमनवस्थानादेतेनास्याधिक्यम् ॥ (C).

७२। अथ सिंहिनीमुदाहरति बरिसइति। निस्तंव [णीसंक]—निश्शंकः जग्गंतो—जाग्रत् महाजागरूक इत्यर्थः, साहसंको—साहसांको विक्रमादित्यः, कण[अ]ह बिट्ठिं—कनकस्य वृष्टिं बरिसइ—वर्षति, अथच दिआणिसं—अहोरात्रं, भुवने जगति तप्पइ—तपति, अतः इंदं—इंद्रं च सूरबिंबं—सूर्यविंबं च, णिंदइ—निंदति। इंद्रो जलं वर्षति महातापसेभ्यः साशंकस्य, सूर्यस्य दिवैव तपत्यजागरूकस्य, अयं तु कनकं वर्षति निश्शंकस्य, सर्वदा च तपति जागरूकस्येति तौ निंदतीति भावः। (E).

७३। १ चतु (B), चौ (E). २ पूव्वद्धे (B & C). ३ उत्तद्ध (A & E), उत्तरद्धे (D). ४ विहोइ (A), हो (B & D), dropt in (C), वि होंति (E), वि च (F). ५ समरूआं (C & E), समरूवा (F). ६ सो (D & F). ७ विआणह (A), विआणेह (B), विआणउं (D). ८ भणेइ (C & F), भणइं (D). ९ मुद्धिणि (F). १० संभेदाः (F). ११ ७० (A), ७२ (E & F).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

७२। सिंहिनी यथा ॥ बरीति ॥ वर्षति कनकस्य वृष्टिं तपति भुवनानि दिवानिशं जाग्रत्। निःशंकः साहसांको निंदतींद्रं च सूर्यविंबं च ॥ साहसांको विक्रमादित्यः ॥ व्यतिरेकोऽलंकारः ॥ ७२ ॥ (G).

७३। अथ खंधकमाह ॥ चतुर्मात्रा अष्टौ गणाः पूर्व्वार्द्धे उत्तरार्द्धे भवन्ति समरूपाः। तां खन्धकां विजानीहि पिङ्गलः प्रभणति मुग्धे बहुसंभेदाम् ॥ समरूपा अष्टौ गणा इत्यर्थः। तेन चतुर्मात्रगणाष्टकं पूर्व्वपरार्द्धयोः। उत्तरार्द्धे चैकलघुः षष्ठो गणोऽत्र न सम्भवति। किन्तु जगणश्चतुर्लघुर्व्वा गणः कार्य्यः, दीर्घान्तत्वं चरणान्तःपातिदीर्घा णे[नै]वेति बोध्यम् ॥ (C).

७३। अथ स्कंधकं लक्षयति चौमत्तेति। पुव्वद्धे उत्तद्धे वि—पूर्वार्द्धे उत्तरार्द्धेऽपि, समरुआ—समरूपाः समं षष्ठजगणं तद्रूपं येषां तादृशा इत्यर्थः। यत्तु समं षष्ठजगण-नलघ्वन्यतरत्कमिति तन्न, अत्र नलघुदानासंभवात्। इदं चानुपदमेव व्यक्तीभविष्यति। चौमत्ता अट्ठ गणा—चतुर्मात्रिका अष्टौ गणाः होंति—भवंति, तत् बहुसंभेआ—बहुसंभेदकं बहवो वक्ष्यमाणाः सप्तविंशतिविधाभेदा यस्य तत्तादृशं खंधहा[आ]—स्कंधकं विआणहु—विजानीत इति पिंगल पभणेइ—पिंगलः प्रभणति, मुद्धि—हे मुग्धे। अत्र उत्तद्ध इति तकारः संयुक्तपरोऽपि लघुर्बोध्यः, कत्थवि संजुत्तपरो इत्युक्तेः (Vide ४र्थ श्लोकः p. 6.—Ed.), अन्यथाऽत्र षष्ठे पंचमात्रापत्त्या जगणासंभवाल्लक्षणं न संगच्छते, एतत्तत्त्वं पुनर्भेदप्रकारावसरेऽनुपदमेव विवेचयिष्यामः। (E).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

जहा, जं जं आणेइ गिरिं
रइरह[1] चक्क परिहट्टण[2] सहं हणुआ[3]।
तं तं लीलाइ णलो
वामकरत्थंभिअं[4] रएइ[5] समुद्दे[6] ॥ ७४[7] ॥ [स्कंधकम्]

७३। अथ स्कंधकम् ॥ चउम। चतुर्मात्रा अष्टगणाः पूर्वार्द्धे उत्तरार्द्धेऽपि च समरूपाः। तं स्कंधकं विजानीत पिंगलो भणति बहुभो भेदाः॥ अस्येति शेषः॥ दलद्वयेऽपि द्वात्रिंशन्मात्रा-इत्यर्थः॥ ७३॥ (G).

७४। यं यमानयति गिरिं रविरथचक्रपरिघट्टनसहं हनु-मान्। तं तं लीलया नलो वामकरोत्तोलितं रचयति समुद्रे॥ (C).

७४। स्कंधकमुदाहरति जं जमिति। हणुआ—हनुमान्, रविरहचक्कपरिघसाणसह—रविरथचक्रपरिघर्षणसहं जं जं—यं यं गिरिं पर्वतं, आणेइ—आनयति, तं तं णलो—नलः वामकर-त्थंभिअं—वामकरोत्तंभितं, लीलाइ—लीलया अनायासेन, समुद्दे—समुद्रे, रएइ—रचयति॥ (E).

७४। यथा॥ यं यमानयति गिरिं रविरथचक्रपरिघर्षणसहं हनूमान्॥ तं तं लीलया नलो वामकरस्तंभितं रचयति समुद्रे॥ ७४॥ (G).

७४। १ रविरह (B & C), रइरथ (F). २ पद्रिघ्वट्टण (D), परिघट्टण (E), परिग्घसण (F). ३ हणुमा (A, B & C). ४ करच्छंभिअं (A), करोत्थुम्भिअं (B), कथत्थम्भिअं (C), करत्थंहि (D). ५ रचइ (D). ६ समुद्दे (C). ७ ७१ (A), ७४ (E & F).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

णंदउ[१] भद्दउ[२] सेस सरंग[३]
सिब बंभ[४] बारण[५] बरुण[६],
णीलु[७] मअण[८] तालंक[९] सेहरु[१०]
सरु[११] गअणु[१२] सरहु[१३] बिमइ[१४],
खीर[१५] णअरु णरु णिद्ध[१६] णेहलु[१७] ।
मअगलु[१८] भोअलु[१९] सुद्ध सरि
कुंभ कलस ससि जाण[२०] ।
सरह[२१] सेस ससहर[२२] मुणहु
सत्ताइस[२३] खंधाण ॥ ७५[२४] ॥ राजसेना ।

७५। अथ खन्धकभेदानाह ॥ नन्द भद्र शेष सारङ्ग शिव ब्रह्म वारण वरुण नील मदन तालङ्क शेखर [सर] गगन सरभ [विमति] स्थिर नगर न[र] स्निग्ध नेहन मदकल भोल शुद्ध श्री कुम्भ कलश शशिनो जानीहि। सर्व्वस्य शेषैः शशधरं जानीहि अष्टाविंशतिं

७५। १ णंद (B, C & F). २ भद्द (F). ३ सारंग (A. B & C), सारंभ (F). ४ बह्म (A), बम्भु (B), बमह (C). ५ बारण (A & B), बाराणा (D). ६ बरुणो (F). ७ णील (A), णीलइ (E). ८ मअणु (B & C), मदण (F). ९ तलंक (E). १० सेहर (E & F). ११ सर (C). १२ सरु गअणु (F). १३ सरइ (B), सरह (C). १४ बिमद्दि (A), बिमई (D). १५ धीर (A), खीर (D), खीरअ (F). १६ सिद्ध (F). १७ णेहर (A). १८ मअगुलु (E), मदगलु (F). १९ भोलउ (B, C & D), लोलउ (E), भूअलु (F). २० णाम (E). २१ सरळ (B), सरभ (F). २२ सिहर (E), ससधर (F). २३ अट्ठाइस (A, B, C & D), भेआ सब्बतुग अट्ठाईस खंधाण (F). २४ ७३ (A), ७५ (E & F).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

खन्धकानाम्। एते च नन्दाद्याः शशिशेषा अष्टाविंशतिभेदा-भवन्ति, तस्यैव विवरणं सर्व्वशेष इति। (C).

७५। अथ पुरः सप्तविंशतिभेदानयनप्रकारं विवक्षुः स्कन्धावृत्तेन प्रथमं तावन्नामानि संख्यां चाह। नंद इति। नंदः [१] भद्रः २ शेषः ३ सरंग—सारंगः ४ शिवः ५ ब्रह्मा ६ वारणः ७ वरुणः ८ णीलइ—नीलः ९ मअणतलंक—मदनताडंकः १० शेखरः ११ शरः १२ गगनं १३ शरभः १४ विमतिः १५ चीरं १६ नगरं १७ नरः १८ स्निग्धः १९ स्नेहलः २० मदकलः २१ लोलः २२ शुद्धः २३ सरिः २४ कुम्भः २५ कलशः २६ शशी २७ इति हि शरभ-शेष-शशधराः प्राकृतकवयः खंधाण—स्कंधके, सत्ताइस—सप्तविंशतिः णाम—नामानि, मुण-ऊ—जानीत॥ क्वचित्तु णाम इत्यत्र जाण इति पाठस्तत्र विज्ञेय-इत्यर्थस्तदा नामद्वैविध्यं परिहार्यम्। अत्र क्वचिदट्ठाइस खंधाण इति पाठः, स तु लेखकप्रमादाज्जातः, एतदनुरोधेन च मनंद-[मदन]ताटंक इति नामद्वयं विधाय त्रिशुर्वष्टपंचाशल्लघ्वात्मक-मष्टाविंशतिभेदं वदंति, तदपि भ्रमविलसितं, क[त]स्य गाथाभेद-त्वादत्रापि षष्ठो जगणो दलद्वये देयः, अंते च गुरुरेव स्थाप्य इति एकैको गुरुः [ज]गणस्य एकैकस्यांत्य इति मिलित्वा प्रतिभेदं दल-द्वये गुरुचतुष्टयमावश्यकम्, एवं च त्रिंशद्गुरवश्चत्वारो लघवश्च यत्र पतंति स आद्यो भेदः, चत्वारो गुरवः षट्पंचाशल्लघवश्च यत्र पतंति स चरमो भेद इति त्रिगुरूणामसंभवात् सप्तविंशतिरेव भेदा न त्वष्टाविंशतिरिति, तांश्च भेदाननुपदमेव स्पष्टीकरिष्यामः। न चैतस्य गाथाभेदत्वे उत्तरार्द्धे षष्ठो गण एकलघ्वात्मक एव

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

स्यादिति वाच्यम्, उद्गाथावदत्रापि षष्ठे जगणस्थापने बाधकाभावात् । ननु तथापि तद्वदत्रापि षष्ठो गणो नलघ्वात्मक एव स्यादिति पादांतस्थगुरुयुगस्यैवा[व]श्यकत्वं न तु जगणांतर्गतस्येति प्रतिभेदं कथं गुरुचतुष्टयस्यावश्यकत्वमिति चेत्तन्न, द्विगुरुषष्टिलघ्वात्मकैकोनत्रिंशत्तमभेदापत्ते-र्नलघुदानस्य सर्वथा निषेधात् । अतएव गाथामध्योदितसप्तगणदाननियमादत्र तद्भंगेऽपि यथा नापौ[पि] विशेषलक्षहानिस्तथांतिमगुरुद्वयस्यैवावश्यकत्वं न पादांतस्थस्य, तथा च त्रिगुरुसत्त्वेऽपि तथाविधगुरुद्वयवत्त्वस्याबाधान्न त्रिगुर्वष्टपंचाशल्लघ्वात्मके भेदे किंचिद्बाध[क]मस्तीत्यपास्तं द्विगुरुषष्टि[ल]घ्वात्मकभेदापत्तेः दुर्वरि[त]त्वात् । किं च गाहिनीसिंहिन्योरुत्तरार्द्धपूर्वार्धयोरिवात्रापि गुर्वंतसप्तगणनियमभंगेना[ने]यं विशेषलक्षहानिर्भवति भवति च दलद्वयांतस्थगुरुद्वयनियमभंगे सर्वत्र उद्गाथादौ दलद्वयांतस्थगुरुद्वयनियमदर्शनात्, एवं चैतस्यावश्यकत्वे त्रिगुर्वष्टपंचाशल्लघ्वात्मको भेदः खपुष्पकल्प एवेति, न च तथापि, दलद्वयेऽपि षष्ठो जगण एव न देयः किंतु एकत्र जगणः परत्र नलघुः एवं जगणस्य एको गुरुः पादांतस्थं गुरुद्वयमिति प्रतिभेदं गुरुत्रयमावश्यकमित्थं च यत्र षड्लघवः एकोनत्रिंशद्गुरवश्च पतंति स आद्यो भेदः, यत्र च त्रयो गुरवोऽष्टपंचाशल्लघवश्च पतंति सोऽंतिमश्चेदिति तथाविधे भेदे न किं[चि]द्बाधकमस्त्यस्ति च तथाविधम् इति वाच्यम्, चौलक्ष्ठ कत्यबीति विरोधात्, उदाहरणे च दलद्वयेऽपि जगणस्यैव दर्शनात्, पूर्वं समरूपाश्चतुर्मात्रिका अष्टौ गणा देया इति लक्षणोक्तविरोधाच्च, यतः समरूपत्वं तेषां तदैव निर्व-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

चउ[1] लहु कत्थबि[2] पसर जहिँ सो सहि णंदउ जाण ।
गुरु टुट्टइ बेलहु चलइ[3] तं तं णाम बिआण ॥ ७६ ॥
दोहा ।

इति यदि पूर्वार्द्धे यो गणः षष्ठः उत्तरार्द्धेऽपि स एव स्यादिति, पूर्वोक्तभेदापत्त्या चैकत्र तदावश्यकत्वेऽपरत्रापि तस्यैवोचितत्वात्, दीयतां वा षष्ठे जगणः अपरत्र चतुर्लघुः [लघवः] क्रियंतां च तेनैव प्रकारेण भेदास्तथापि भवदुक्तरीत्या प्रस्तारक्रियया त्रिगुर्वष्टपंचाशल्लघ्वात्मको भेदः सप्तविंशतितम एवायाति न त्वष्टाविंशतितम इत्यस्मत्तातचरणैरुपदिष्टः पंथास्सुधीभिर्विभावनीयः । (E).

७५ । अथैकैकगुरुह्रासे भेदनामाह ॥ णंदेति ॥ नंद १ भद्र २ शेष ३ सारंग ४ शिव ५ ब्रह्मन् ६ वारण ७ वरुण ८ नील ९ मदन १० ताड़ंक ११ शेखर १२ शर १३ अन्यत् गगन १४ शरभ १५ विमति १६ क्षीर १७ नगर १८ नर १९ स्निग्ध २० स्नेहालु २१ मदकल २२ भूपाल २३ शुद्ध २४ सरित् २५ कुंभ २६ कलश २७ शशिन् २८ । विज्ञाः शरभ-शेष-धरा जानीत भेदान् सर्वान् भवंतोऽष्टाविंशतिं स्कंधके ॥ भो विज्ञाः शरभ-शेष-धराः प्राकृतकवयः इति संबुद्धिः ॥ ७५ ॥ (G).

७६ । कथमेते भेदा भवन्तीत्याह । अर्द्धे द्वौ लघू प्रसरतो यस्मिन् तं सखि नन्दं जानीहि । गुरुस्तुटति द्वौ लघू उत्तिष्ठत-

---

७६ । १ चौ (A & E), छइ (B), चउबि (C), चट्ठबि (F). २ लउआ (B, C & F). ३ ख वि लक्ष बड़इ (D), बिबिलक्ष वड़इ (E).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

स्तत्तन्नाम विजानीहि ॥ अयमर्थः — एकैकस्मिन्नर्द्धे लघुद्वयं प्रसरति षष्ठजगणसम्बन्धात्, तेन लघुचतुष्टयं त्रिंशद्गुर्व्वपि नन्दलक्षणम्, उदाहरणेनैव व्यक्तीकरिष्यति । एकैक[गुरु]स्थाने द्वि-द्वि-लघुकरणाद्यथाक्रमं भद्रादि-सप्तविंशतिगुरुह्रासात्त्रिगुरुः शशी शेषे ॥ (C).

[There should not be less than two long syllables in each half, one at the end, and the other in the 6th *gana* which must be a जगणः; otherwise there will be no जगणः, and it will be a रंडा. Vide p. 118, and commentary (E) pp. 134-135.—Ed.]

७६ । अथ सप्तविंशतिभेदानदा[य]नप्रकारं दोहावृत्तेनाह । चौ लहु कत्थवीति । सहि — सखि, जहि — यत्र, चउ लहु — चत्वारः लघवः, कत्थवि — कुत्रापि, पसर — प्रसरंति, सो णंदउ जाण — तं नंदं जानीहि, यदि गुरु टुट्टइ — गुरुस्त्रुटति ह्रसतीत्यर्थः, बिबि लहु वढइ — द्वौ लघू वृद्धिं प्राप्नुत इत्यर्थः, तदा तं तं णाम विआण — तत्तत् भद्रादिकं नाम जानीहि । अयमर्थः — पूर्वोक्तप्रकारेण दलद्वये षष्ठं जगणमेव दत्त्वा चतुर्मात्रिका अष्टौ गणाः प्रतिदलं विधेयाः, एवं च गाथावदत्रापि प्रथमचरणे द्वादशमात्राः स्थाप्यास्तासां षड्गुरवः, द्वितीयचरणे पंचचतुर्मात्रिकाणां सत्त्वात्तेषां विंशतिर्मात्रास्तासां च षष्ठजगणाद्यंतर्गतलघुद्वयं विहाय नवगुरवो भवंति, तदेवं प्रथमदले पंचदशगुरवो द्वौ लघू, एवं द्वितीयदलेऽपि, तथाच द्वयोर्दलयोर्मिलित्वा यत्र त्रिंशद्गुरवः षष्ठजग[ण]द्वयांतर्गतास्त्वारो लघवः पतंति, स नंदः प्रथमभेदः, यदि च त्रिंशद्गुरुषु एकैकगुरुह्रासेन तत्समानमात्राकं लघुद्वयं वर्द्धते तदा भद्रादयो भेदा भवंति, ते च प्रदर्श्यंते लिखित्वा ॥ (E).

[Here something has been omitted by the scribe.—Ed.]

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

जहा, चंदा कुंदा कासा
हारा हीरा तिलोअणा केलासा ।
जेत्ता[1] जेत्ता[1] सेत्ता
तेत्ता[2] कासीस जिणिअा ते[3] कित्ती[4] ॥ ७७[5] ॥
नन्दः । इति गाथाप्रकरणम् ॥

---

७६ । भेदानयनप्रकारमाह ॥ अट्ठेति ॥ अष्टावपि लघवः प्रसरंति यत्र तं सखि नंदं विजानीहि । गुरुस्त्रुट्यति द्विलघुर्वर्धते तत्तन्नाम विजानीत ॥ तत्तन्नामानि भद्रादीनीत्यर्थः । (G).

७७ । उदाहरति । चन्द्रः कुन्दं काशं हारो हीरस्त्रिलोचनः कैलासः । यावन्तो यावन्तः श्वेतास्तावन्तः काशीश जितास्ते कीर्त्त्या ॥ अत्रान्योऽपि खन्धकभेदो दृश्यते, यथा, अन्तेगुरुमध्यलघुकौ पञ्चकलौ द्वौ तृतीयसप्तनागौ[?] । गाथावत् परमखिलं कथितोऽसौ भिन्नखन्धकः कविना ॥ यथा, भ्रमिमरतिमलसहृदयतां प्रलयं मूर्च्छां तमः शरीरपातं । मरणञ्च जलधर जगतां सम्प्रति कुरुषे विषं वियोगिनीनाम् ॥ एवमर्द्धखन्धकोऽपि । (C).

७७ । अथ नंदाख्यं स्कंधकभेदमुदाहरति चंदेति । चंदा—चंद्रः, कुंदा—कुंदः, कासा—कासः, हारा—हारो मुक्तादाम, हीरा—हीरकं, तिलोअणा—त्रिलोचनः कर्पूरगौर इति यावत्,

---

७७ । १ जत्ता (B), जात्ता (C). २ तत्ता (B & C). ३ तो (C). ४ कीत्ती (C). ५ ७४ (A), ७७ (F). This *sloka* has been omitted by the scribe in the text of (E), but not in the commentary.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अथ दोहा (D, E & F).

तेरह मत्ता पढम पअ पुणु[1] एआरह देह[2]।
पुणु[1] तेरह एआरहहि[3] दोहा लक्खण एह[4] ॥ ७८[5] ॥

केलासा — कैलासः पर्वतः इत्यादीनीति शेषः, जेत्ता जेत्ता सेत्ता — यावंति[यावंति]श्वेतानि, तेत्ता — तावंति, हे कासीस — काशीपते दिवोदास, ते तव कित्ती — कीर्त्या जिणिआ — जिजा[ता]नि, एतेभ्योऽपि त्वदीया कीर्त्तिरतिधवलेति भावः।

* इति श्रीपिंगलप्रकाशे गाथाप्रकरणम्। * (E).

७७। तत्र नंदो यथा ॥ चंदेति ॥ चंद्राः कुंदाः काशा हाराः हीराखिलोचनः कैलासः। यावंतो यावंतः श्वेताः काशीश्वर जीयंते ते कीर्त्या ॥ काशीश्वरो दिवोदासः ॥ ७७ ॥ (G).

७८। अथ दोहामाह। त्रयोदशमात्राः प्रथमपदे पुनरेकादश मात्रा देहि। पुनस्त्रयोदशैकादशभिर्दोहालक्षणमेतत् ॥ पुनरित्यर्थात् द्वितीयपदे, त्रयोदशैकादशभिः तृतीयचतुर्थचरणौ भवतः। (C).

७८। अथ द्विपथां लक्षयति तेरहेति। पढम पअ — प्रथमपादे, तेरह मत्ता — त्रयोदश मात्राः, देऊ — देहि, इदं च क्रियापदं सर्वत्रान्वेति, पुनः द्वितीयचरणे इत्यर्थः, एआरह — एका-

---

७८। १ पुण (B & C). २ देऊ (E), देहि (F). ३ एआरह (B), एआरहह (C), एआरहहिं (D), हि dropt in (E). ४ सेऊ (B), एेह (C), एऊ (E), एहि (F). After this in D "द्विपथेयं" इति। ५ ७५ (A), ७८ (E & F).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

जहा, सुरअरु सुरही परसमणि
णहि बीरेस समाण।
ओ बक्कल[1] अरु[2] कठिणतणु
ओ पसु ओ पासाण[3] ॥ ७९[4] ॥ दोहा।

दश मात्रा देहि [इ]ति पूर्वेणान्वयः, पुणु—पुनः तृतीयचरणे इत्यर्थः तेरह—त्रयोदश मात्रा देहीति पूर्वेणान्वयः, चतुर्थचरणे इति शेषः एआरह—एकादश मा[त्रा] देहीति तेनैवान्वयः, एऊ—एतद् दोहा लक्खण—द्विपथालक्षणम् ॥ (E).

७८। अथ दोहामाह ॥ तेरहेति ॥ त्रयोदश मात्राः प्रथमे पादे पुनरेकादश देहि। पुनस्त्रयोदश एकादश दोहालक्षणमेतत् ॥ क्रमात्पादे[षु] एतत्संख्या मात्राः कार्या इत्यर्थः ॥ इयं द्विपथेति संस्कृते ॥ ७८ ॥ (G).

७९। सुरतरुः सुरभिः स्पर्शमणिर्नहि वीरेशसमानः। असौ वल्कलेन भवति कठिनतनुः, असौ पशुः, असौ पाषाणः ॥ (C).

७९। द्विपथामुदाहरति सुरअरु इति। सुरतरुः कल्पवृक्ष इत्यर्थः, सुरही—सुरभिः कामधेनुरित्यर्थः, परसमणि—स्पर्शमणिः, एते इति शेषः, बीरेस समाण—वीरेशसदृशा नहि। तत्र हेतुमाह ओ बक्कल इति। ओ—सः सुरतरुरित्यर्थः बक्कल ओ कठिणतणु—वल्कलः वल्कलमय इति यावत् अथच कठिन-

---

७९। १ बक्कर (A), बक्कलो (B), बक्कलु (F). २ हो (A, B & C), चो (D & E). ३ पाहाण (A), पाखाण (B & C). ४ ७६ (A), ७८ (E & F).

CC-0. In Public Domain. Funding by IKS-MoE

भमरु भामरु सरहु सेचाण[1] मंडूअ[2] मक्कड[3] करहु[4],
णरु[5] मरालु[6] मअगलु[7] पओहरु[8] बलु बाणरु[9] तिसि[10] कलु,
कछ्छ मछ्छ[11] सद्दूल[12] अहिबरु[13] ।
बग्घ[14] बिराडउ[15] सुणह[16] तह उंदुर[17] सप्प पमाण[18] ।
गुरु टुट्टइ बे लहु चलइ[19] तं तं णाम बिआण[20] ॥ ८०[21] ॥

रड्डा ।

तनुः, ओ पसु — सा सुरभिः पशुः विवेकरहिता, ओ पाषाण — सः स्पर्शमणिः पाषाणः जड़ इति भावः, वीरेश्वरस्तु मृदुचित्तः विवेकी महाबुद्धिरिति तेभ्यो विलक्षण इति भावः । (E).

७९ । यथा सुरेति ॥ सुरतरुः सुरभिः स्पर्शमणिर्नहि वीरे-श्व[र]समानाः । स सवल्कलोऽन्यत् कठिनतनुः, सा पशुः, स पाषाणः ॥ वीरेश्वराख्यो राजा स्तूयते ॥ ७९ ॥ (G).

८० । तद्भेदानाह । भ्रमर भ्रामर सरभ श्येन मण्डल मर्कट

---

८० । १ सचान (B & C), सेचाणु (D), सरबाण (E). २ मच्छव (B & C), मंडूक (E & F). ३ मक्कलु (B & C), मक्कड (D). ४ करभ (E), करह (F). ५ वाणव (E). ६ मराल (A). ७ मयगंध (A), मच्छगण (B). ८ पच्छहर (A). ९ चल चारण (A), वल वाणव (B). १० तिच्छच्छ (A), तिच्छं (D), तीच्छ (E). ११ कच्छ मच्छ (B & C). १२ सद्दुल (B), सक्कुन (C), सद्दूलं (D), सद्दूल (E). १३ अहिवर (A), अहीवर (E). १४ वग्घ (B & C), वग्घ (D), तह बरघ्व (E). १५ विरालउ (B, C & E). १६ सणहि (B). १७ उँदुर (A), उन्दुर (B & C), उंदर (D). १८ प्पमाण (A), समाण (B), ममाण (D). १९ वलइ (E), चढइ (D & F). २० विआरि (A & B). २१ ७७ (A), ८० (E), ८१ (F).

Digitized by eGangotri and Sarayu Trust.

छब्बीस[1]क्खर[2] भमर[3] हो गुरु बाइस लहु चारि[4] ।
गुरु[5] टुट्टइ वे लहु चलइ[6] तं तं णाम विआरि[7] ॥ ८१[8] ॥

दोहा ।

करभाश्व, [नर]मराल मदकल पयोधर चल वानर त्रिकर कच्छप मत्स्य शार्द्दूलाहिवरान् । व्याघ्रविडालौ जानीहि, तथा उन्दुरसर्पौ प्रमाणम् । गुरुस्त्रुट्यति द्वौ लघू उत्तिष्ठतः तत्तन्नाम विजानीत ॥ (C).

८० । अथैतद्भेदान् रङ्गावृत्तेनाह भमरु इति,—भ्रमरः १, भ्रामरः २, शरभः ३, सरबाण—श्येनः ४, मंडूकः ५, मर्कटः ६, करभः ७, नरः ८, मरालः ९, मदकलः १०, पयोधरः ११, बलः १२, वानरः १३, त्रिकलः १४, कच्छपः १५, मत्स्यः १६, सदूल—शार्द्दूलः १७, अहीबर—अहिवरः १८, व्याघ्रः १९, विरालः २०, शुनकः २१, तह—तथा उंदुरः २२, सर्पः २३ इति, यदा गुरु टुट्टइ—गुरुस्त्रुटति ह्रसतीत्यर्थः, वे लहु—द्वौ लघू बढइ—वर्द्धते, तदा तं तं—तत्तत् भ्रमरादिकं णाम—नाम, विआण—विजानीहि इति पमाण—प्रमाणं निश्चितमित्यर्थः ॥ ८० ॥ (E).

८० । अथ तस्य त्रयोविंशतिनामानि । भ्रमर १, भ्राम[र] २, शरभ ३, श्येन ४, मंडूक ५, मर्कट ६, करभ ७, नर ८, मराल ९, मदकल १०, पयोधर ११, ब[ल] १२, वानर १३, त्रिकल १४, कच्छ[प] १५, मत्स्य १६, शार्द्दूल १७, अहिवर १८, व्याघ्र १९,

---

८१ । १ छब्बिस (A). २ क्खब (B & C), खर (F). ३ भमब (B & C). ४ चारी (A). ५ This line is dropt in (C). ६ वलइ (A), बढइ (D & E). ७ विआरी (E). ८ ७७ (A), ८१ (E & F).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

विड़ाल २०, शुनक २१, तथा उंदुर २२, सर्प्प २३ इति ॥ ८० ॥ (G).

८१ । गुरुत्रोटनादेव कथं तत्तद्भेदास्तत् स्पष्टीकर्त्तुमाह । षड्विंशत्यक्षरो भ्रमरो भवति, गुरवो द्वाविंशतिर्लघवश्चत्वारः । गुरुस्त्रुटति द्वौ लघू उत्तिष्ठतस्तत्तन्नाम विचारय ॥ अत्र पादचतुष्टये लघुचतुष्कं सिद्धमवशिष्टा द्वाविंशतिर्गुरवः ॥ तेन षड्विंशत्यक्षरा दोहा भ्रमरनामिका, एकैकगु[रु]ह्रासे द्विद्विलघुवर्द्धने भ्र[भ्रा]-मरादिनामानि । (C).

८१ । अथैनमेव प्रस्तारप्रकारं दोहावृत्तेन विशदीकरोति छब्बीस इति । बाइत[स]—द्वाविंशतिः, गुरु—गुरवः, चारि—चत्वारः, लऊ—लघवः, एवं छब्बीसक्खर—षड्विंशत्यक्षराणि, भमर हो—भ्रमरे भवंति, तत्र यदा गुरु टुट्टइ—गुरुस्त्रुटति न्यूनो भवति, बे लऊ वढइ—द्वौ लघू वर्द्धेते, तदा तत्तद्भ्रामरादिकं नाम विआरि—विचारय जानीहीत्यर्थः । अयमर्थः—पूर्व्वं द्विपथायाः प्रथमचरणे त्रयोदशमात्राणामुक्तत्वाद् तासां च प्रथमं षट्कलः पुनश्चतुष्कलः पुनस्त्रिकलः स्थाप्य इति (Vide श्लोक ८५, p. 146. — Ed.) उट्टवनिकाप्रकारस्य वक्तव्यत्वादेकलघुः प्रथमचरणे त्रिकलांतर्गत आवश्यकः, अन्यथा त्रयोदशमात्राणामसंभवापत्तेः, एवं द्वितीयचरणे एकादशमात्राणामुक्तत्वात्तासां च प्रथमं षट्कलस्ततश्चतुष्कलस्तत एककलः स्थाप्य इति उट्टवनिकाप्रकारस्य वच्यमाणत्वात्तत्राप्येको लघुरावश्यकः, एवं तृती[य]चतुर्थयोरप्येकैको लघुरावश्यक इति लघुचतुष्टयं प्रतिभेदमावश्यकमेवं च प्रथमचरणे द्वादशमात्राणां षड्-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

जहा, जा अद्धंगे[1] पव्वई[2] सीसे गंगा जासु[3] ।
जो लोआणं[4] बल्लहो बंदे पाअं तासु ॥ ८२[5] ॥

भ्रमरः ।

गुरवस्त्रयोदशमात्रात्मकस्त्वेको लघुरेवं द्वितीयचरणे दशमात्राणां पंच गुरव एकादशतममात्राकस्त्वेको लघुरेवं पूर्वदले एकादश गुरवो द्वौ लघू, एवं त्रयोदशाक्षराणि पतंति, एवं परदलेऽपि इति द्वाविंशतिगुरवश्चत्वारश्च लघवो यत्र पतंति [तत्र] भ्रमरः । अत्र षड्विंशत्यक्षरात्मके भ्रमरे च यद्येको गुरुर्न्यूनो भवति पूर्वभेदस्थ-लघुचतुष्टयेनैकीकृत्य तत्समानमात्रासंख्याकं च लघुद्वयं वर्द्धते, एवमेकविंशतिगुरवः षड्लघवश्च यत्र पतंति, स भ्रामरः । एवं पूर्वभेदापेक्षया उत्तरत्र भेदे एकं गुरुं न्यूनं कृत्वा लघुद्वयमधिकं कृत्वा ते ते भेदा वाच्याः, ते लिखित्वा प्रदर्श्यंते ॥ ८१ ॥ (E).

[Here apparently something has been omitted.—Ed.]

८१ । अथ तदानयनप्रकारमाह ॥ छब्बीसेति ॥ षड्विंशत्यक्षरो भ्रमरो भवति । गुरवो द्वाविंशतिः लघवश्चत्वारः । एको गुरु-स्त्रुट्यति द्वौ लघू वर्धेते तत्तन्नाम विजानीहि ॥ एकादिगुरुह्रासे द्व्यादिलघुवृद्धौ भ्रामरादीनि नामानि भवंतीत्यर्थः ॥ ८१ ॥ (G).

८२ । यस्यार्द्धाङ्गे पार्व्वती शीर्षे गङ्गावासः । यो लोकानां बल्लभो वन्दे पादं तस्य ॥ (C).

८२ । अथैतेषु भेदेषु आद्यं भ्रमरनामकं भेदमुदाहरति जा

---

८२ । १ अबांगे (C), अद्धंगो (E). २ पव्वइ (A). ३ वासु (B & C), थासु (F). ४ देवाणं (D & F), देवाणं (E). ५ ७८ (A), ८२ (E & F).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

बारह लहुआ बिप्पी
तह[1] बाईसे[2] हिँ खत्तिणी[3] भणिआ ।
बत्तीस[4] होइ वेसी[5]
जा इअरा[6] सुद्दिणी[7] होइ[8] ॥ ८३[9] ॥ गाहा ।

अद्धंग इति । जा अद्धंगे पब्बई — यस्यार्द्धांगे पार्वती, सीसे गंगा जासु — शीर्षे गंगा [यस्य], जो — यो, देवानां बल्लभः, तासु पाअं — तस्य पादौ, वंदे — नमस्करोमि ॥ ८२ ॥ (E).

८२ । तत्र भ्रमरो यथा ॥ यस्यार्धांगे पार्वती शीर्षे गंगा यस्य । यो देवानां बल्लभो वंदे पादौ तस्य ॥ (G).

८३ । या[जा]तिमाह, द्वादशलघुका विप्री[प्रा] भवति, तथा द्वाविंशत्या क्षत्त्रिया भणिता । द्वात्रिंशता भवति वैश्या जातिवरा, शेषे शूद्रा भवति ॥ (C).

८३ । अथ वर्णभेदेन द्विपथाया जातिभेदमाह, [बारह] लहुआ — द्वादशलघुका द्विपथेति शेषः, बिप्पी — विप्रा भवतीति शेषः, तह बाईसेहिं — तथा द्वाविंशतिभिर्लघुभिरिति शेषोऽग्रेऽपि योजनीयः, खत्तिणी भणिआ — क्षत्त्रिया भणिता, बत्तीस — द्वात्रिंशद्भिर्लघुभिः वेसी — वैश्या होइ — भवति । जा इअरा — या इतरा अनुक्तलघुसंख्याका सा सुद्दिणी होइ — शूद्रा भवति ॥ (E).

---

८३ । १ तह (C). २ बाइसोह (C), बाबीसे (F). ३ खत्तीणी (D). ४ बत्तीसा (C). ५ वेसि (A). ६ इअरा (C). ७ सा सुद्दिणी (E). ८ होई (F). ९ ७९ (A), ८२ (E & F).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

जस्सा[1] पढमहि तीए[2] जगणा[3] दीसंति[4] पाअ पाएण[5] ।
चंडालह[6] घर रहिआ[7] दोहा दोसं पआसेइ[8] ॥ ८४[9] ॥
गाहा ।

८३ । द्वादशैर्लघुभिर्विप्रा तथा द्वाविंशैः क्षत्रिया भणिता । द्वात्रिंशद्भिर्वैश्या, येतरा शूद्रि[द्रा]णी भवति ॥ ८३ ॥ (G).

८४ । दोहादोषमाह । यस्याः प्रथमे तृतीये जगणो दृश्यते पादपादैः । चण्डालगृहस्था [दोहा] दोषं प्रकाशयति ॥ पादपादैः सह—इत्यनेन प्रथमपादे द्वितीयपादेन सह, तृतीयपादो[दे] चतुर्थपादेन सह, इत्यर्थः । तेन पादचतुष्टये यत्र जगणा भवन्ति सा दोषवतीत्यर्थः । (C).

८४ । अथ द्विपथाया गणविशेषपुरस्कारेण दोषमाह जस्सेति । जस्सा—यस्याः द्विपथायाः, पढमहि—प्रथमे, पाअ—पादे, तथा तीए—तृतीये, पाए—पादे, ण—ननु निश्चितं, जगणा—मध्यगुरुका गणाः दीसंति—दृश्यंते, सा चंडालह घर रहिआ—चंडालगृहस्थिता, दोहा—द्विपथा दोषं पआसेइ—प्रकाशयति ॥ तथाच दोहाप्रथमतृतीयचरणयोर्जगणो न देय-इति भावः । (E).

८४ । १ जिस्सा (B & C). २ पढम तीए (A), पढमे तीए (E), पढमह तीए (F). ३ जगण (E & F). ४ दिशन्ति (B), दिसंति (D), दिसंदि (F). ५ पाषासु (A), पाएषु (B), पाएसु (C), पायेण (F). ६ चंडाल (B & C). ७ वसिषा (A). ८ पआसेई (D & E). ९ ८० (A), ८४ (E & F).

CC-0. In Public Domain. Funding by IKS-MoE

छक्कलु चक्कलु तिण्णि[1] कलु एमपरि[2] बिसम पअंति[3] ।
सम पाअहिँ[4] अंतेक्ककलु ठबि[5] दोहा णिभ्भंति[6] ॥ ८५[7] ॥

दोहा ।

---

८४ । अथ दोहादोषमाह ॥ जस्सा इति ॥ यस्याः प्रथमे तृतीये जगणा दृश्यंते पादे पादे । चंडालगृहस्थिता दोहा दोषं प्रकाशयति ॥ इव इति शेषः ॥ ८४ ॥ (G).

८५ । अत्र च कियत्कलो गणो ग्राह्य इत्यत्राह । षट्कल-श्चतुष्कलस्त्रिकल एवंप्रायो विषमपाद इति । समपादे अन्ते एक-कलं संस्थाप्य दोहां निर्व्वहति ॥ समपादे द्वितीये चतुर्थे च षट्कलगणानान्तरमेककलमिति [षट्कलचतुष्कलगणानन्तरमेककल-मिति] । (C).

८५ । अथ द्विपथाया उट्टवनिकामाह छक्कलु इति । आदौ छक्कलु — षट्कलः, ततः चक्कलु — चतुष्कलः, ततश्च त्रिकलः, एम-परि — अनया परिपाट्या बिसम — विषमे चरणे गण इति शेषः, पलंति — पतंति, सम पाअहि — समे पादे द्वितीये चतुर्थे चेत्यर्थः । अंते षट्कलचतुष्कलयोरंते इत्यर्थः, एक्ककलु — एककलः पततीति शेषः, इमभंति — एवंप्रकारेण, दोहा — दोहां, ठवि — स्थापय । एक्ककलु अत्र एको ह्रस्वः । अयमर्थः — विषमचरणयोस्त्रयोदश-

---

८५ । १ तिण्ण (B & C). २ Here ए should be read as short. Vide श्लोक ४, p. 7. ३ पलंत्ति (E), पंतिअं (F). ४ पाँअ (A), पाआहि (C), पाअहि (E & F). ५ ठेवि (E). ६ निब्भन्ति (B), णिभवन्ति (C), णिव्वंति (D), इमभंति (E), णिब्भंत (F). ७ ८१ (A), ८५ (E & F).

Digitized by eGangotri and Sarayu Trust.

दिअबरगण धरि[1] जुअल,
पुणबिअ तिअलहु[2] पअल,
इम[3] बिहि बिहु[4] छउ[5] पअणि[6],
जिम सुहइ[7] सुससि[8] रअणि,
इह[9] रसिअउ मिअणअणि,
इह[10] दह कल गअगमणि ॥ ८६[11] ॥

मात्राणां सत्त्वात्प्रथमं षट्कलमात्रास्ततः चतुष्कलस्ततस्त्रिकल एवं त्रयोदश मात्राः स्थाप्याः, समचरणयोश्च प्रथमं षट्कलस्ततश्चतुष्कल-स्तत एककल एवमेकादश मात्राः स्थाप्या इति ॥ ८५ ॥

इति पिंगलप्रकाशे दोहाप्रकरणम् ॥ (E).

८५। षट्कलश्चतुष्कलस्त्रिकलः एवंप्रकारेण विषमपादांते। सम-पादस्यांते एककलः स्थापनीयो दोहायां निर्भ्रान्तम् ॥ समे दा[एका]-दश विषमे एका[त्रयो]दश मात्राः कार्या इत्यर्थः ॥ ८५ ॥ (G).

८६। द्विजवरयुगलं ध्रियते पुनरपि त्रयो लघवः प्रकटाः। अनेन विधिना द्विचतुष्पदा शोभते यथा शशी रजन्याम्। इयं रसिका मृगनयने एकादशकला गजगमने ॥ द्विजवर इति चतु-ष्कलगणे सर्व्वलघोः संज्ञा, तद्युगलेनाष्टौ लघवः, पुनश्च त्रयो-

८६। १ धर (A & C). २ पुणवि तिलड़ (B). ३ एम (B & D), इथ (F). ४ विह (C), विवि (D & F). ५ छअ (A), चउ (C). ६ पल (C). ७ सुहइ जुजिम (A & C), सहइ सुजिम (B), जेम सुहइ (D), जिमु सुहइ (F). ८ सुसमं (D). ९ इथ (B & C), एह (D & E), इधु (F). १० इथ (B, C & D), सुथ (E). ११ ८३ (A), ८६ (E & F).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

जहा, बिमुह[1] चलिअ[2] रण अचलु[3],
परिहरिअ हअ गअ बलु[4],
हलहलिअ[5] मलअ णि[6]बइ,
जसु जस[7] तिहुअण[8] पिअइ[9],
बणरसि[10] णरबइ लुलिअ[11],
सअल उबरि[12] जस[13] फुरिअ[14] ॥ ८७[15] ॥

रसिका ।

लघव इति मिलित्वा एकादश कलाः । द्विचतुष्पदेत्यनेन षट्पदत्व-मुक्तम् । (C).

८६ । अथ रसिकानामकं वृत्तं लक्षयति । दिअबरगणेति । हे मिअणअणि — मृगनयने, गअगमणि — गजगमने, दिअबरगण धरि जुअल — द्विजवरगणस्य चतुर्लघुयुक्तगणस्य युगले स्थापय, पुणविअ — पुनरपि च द्विजवरयुगलानंतरं चेत्यर्थः, तिअलहु पअल — त्रीन् लघून् प्रकटय, इम विहि — एवं विधिना छउ पअणि — षट्पदेषु प्रत्येकमिति भावः, एअ[ह]दह कल — एकादश कलाः, विरु — विधेहि विरचयेत्यर्थः, एहु[अ] रसिअउ — एषा रसिका, जिम — यथा, रअणि — रजन्यां, सुससि — पूर्णश्चंद्रः,

---

८७ । १ विमुह (E). २ चलिह (C). ३ अचल (A & E). ४ वल (A), घलु (B). ५ हलिअअ (A), हलि(F). ६ णर (F). ७ जस जसु (E & F). ८ गाण (D). ९ पिबइ (B, C, D & F). १० रणअसि (B), वरणसि (E & F). ११ णुअ (C). १२ उअरि (B, C & D). १३ जसु (D, E & F). १४ फुलिअ (D, E & F). १५ ८४ (A), ८७ (E & F).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

तथा सुहइ — शोभते। यत्र एकादशमात्रा एवं षट्चरणानि यस्याः सा रसिकेति फलितार्थः ॥ ८६ ॥ (E).

८६ । अथ रसिका छंदः ॥ द्विजवरयोर्गणयोर्धारय युगलं, पुनरपि च त्रिलघु पातय ॥ इति विधिविहितषट्पदा यथा शोभते सुशशी रजन्याम् ॥ एषा रसिका मृगनयने एकादशकला गजगमने ॥ रात्रौ चंद्र इव रसिका शोभते इत्यर्थः ॥ ८६ ॥ (G).

८७ । उदाहरति । विमुखचलितो रणेऽचलः, परिहृत्य हय-गजबलं । हलहति[लि]तो मलयनृपतिः यस्य यशस्त्रिभुवनं पिबति । वाराणसी[नर]पतिर्लुलितः सकलोपरि यशः स्फुरति ॥ यस्य राज्ञः रणे विमुखः सन् अचलनामा राजा चलितः, एतादृशं वैमुख्यं हयगजबलमपि त्यक्तुं[त्वा] हलहलितः कम्पितः, लुलितो भग्नः ॥ (C).

८७ । रसिकामुदाहरति बिमुहेति । अचलः कश्चिद्राजा हअ गअ बल — हयगजबलानि, परिहरिअ — परिहृत्य, रण — रणे विमुखः सन्, चलिअ — चलितः पलायित इत्यर्थः, किञ्च जस जसु तिहुअण पिअइ — यस्य यशः त्रिभुवनं पिबति सोऽपीति शेषः, मलअणिवइ — मलयनृपतिः, हलहलिअ — हलहलितः, किंच बर-णसि णरवइ — वाराणसीनरपतिः दिवोदास इत्यर्थः, लुलिअ — लुलितः पराङ्मुखीभूत इति यावत् । अतः तस्य राज्ञः सकलोपरि यशः स्फुरितम् ॥ ८७ ॥ (E).

८७। यथा कश्चिद्राजसभायां[?] रणादचलन् वाराणसीनर-पतिर्लुलितः सकलोपरि यशः स्फुरि[र]ति ॥ ८७ । (G).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

आइकब्ब उक्कच्छ[१] मह[२] लोहंगिणि किउ[३] सारु[४] ।
गुरु बट्टइ[५] बि[६] बिलहु घटइ[७] तं तं णाम बिआरु ॥ ८८[८] ॥
[दोहा]

८८। तद्भेदानाह। आदिकाव्यमुत्कच्छा स्फुटा लोहाङ्गीमध्ये सारः। गुरुर्वर्द्धते द्वौ लघू विघटेते तत्तन्नाम विचारय॥ या रसिकेत्युक्ता सैवोत्कच्छा स्फुटा स्फुटीकृता। सर्व्वलघुरूपा सा आदिकाव्यं लोहाङ्ग्यादीनां वक्ष्यमाणां मध्ये सर्व्वलघुः श्रेष्ठा प्राथमिकत्वात्। अन्ये कथं भवन्तीत्याह। लघुह्रासगुरुवृद्धिभ्यां तत्तन्नाम ज्ञेयमित्यर्थः। (C).

८८। अथैतस्या नामान्तरकथनपूर्वकं भेदानयनप्रकारमाह आईति। उक्कच्छ मह — उक्कच्छामध्ये उक्कच्छापरपर्यायरसिकामध्ये इति यावत्, सारु — सारभूता, लोहंगिणि — लोहांगिनी, आइकब्ब — आदिकाव्यं प्रथमभेदः किउ — कृतं। गुरुर्वर्द्धते द्वौ लघू ह्रसतः, तदा तं तं — तत्तद् वक्ष्यमाणं नाम बिआरु — विचारय॥ अत्र उक्कच्छेति रसिकायाः पर्यायः, रसिकात्वं च सर्वभेदवृत्ति। तथाच लक्ष्मीत्यादिवत् लोहांगिनीत्वादि व्याप्यं, रसिकात्वं गाथात्वमिव व्यापकं बोध्यम्। (E).

८८। १ उकछ (A), उकच्छ (C), उक्कछ (D & E), उक्कच (F). २ मत्त (B). ३ किउ (A & B), फुरउ (C). ४ सव (A). ५ टुट्टइ (A), वड्ढइ (B). ६ वे (A, B & C). ७ थलइ (A), चलइ (B & C), पठइ (F). ८ ८५ (A), ८८ (E & F).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

लोहंगिणि[1] हंसीआ[2] रेहा तालंकि[3] कंपि गंभीरा ।
काली कलरुद्दाणी[4] उक्कच्छा[5] अट्ठ[6] णामाई[7] ॥ ८९[8] ॥

गाहा ।

८८। रसिकाया नामांतराण्याह॥ आइ॥ आदिकाव्यं उक्कच्चा क्षतं लोहांगिनीमध्ये सारं॥ गुरुर्वर्धते द्वौ द्वौ लघू त्रुय्यतस्तदा तन्नामानि विजानीत॥ रसिकाया एव आदिकाव्यं उक्कचा इति नामद्वयं ज्ञेयम्, लोहांगिन्यादिमध्ये श्रेष्ठं,तत्र गुरुगुरु[लघु]वृद्धिह्रासे अग्रिमाणि नामानि भवंतीत्यर्थः॥ ८८॥ (G).

८९। नामान्याह। लोहाङ्गी हंसी रेखा ताड़ङ्की कम्पिनी गम्भीरा काली कालरुद्राणी उत्कच्छाया अष्ट नामानि॥ (C).

८९। अथ नामान्याह लोहंगिणीति। लोहंगिणि—लोहांगिनी, हंसीआ—हंसिका, रेखा, ताड़ंकिनी, कंपिनी, गंभीरा, काली, कालरुद्राणी इति उक्कच्छाया अष्टौ भेदा इत्यर्थः॥ (E).

८९। लोहं॥ लोहांगिनी १, हंसी २, रेखा ३, तालंकिनी ४, कंपिनी ५, गंभीरा ६, काली ७, कलरुद्राणी ८, उक्कच्छाया अष्ट नामानि॥ ८९॥ (G).

८९। १ Dropt in (D). २ हंसिणिश्चा (A, B & C), हंसीणिश्चा (D). ३ तालंकी (D). ४ कलरुद्दाणि (A), कालरुद्दणी (C), कालरुद्राणी (D). ५ उकच्छ (A), उकचा (F). ६ अट्ट (B & C). ७ णामाइं (A & D), णामाइं (B, C & E). ८ ८६ (A), ८९ (E & F).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

लोहंगिणि[१] सव्वलहू[२] जत्थ[३] गुरू[४] एक्क[५] सा हंसी ।
जंजं बड्ढइ[७] हारो णामं जो[८] जत्थ[३] सो तत्थ[९] ॥ ९०[१०] ॥

[गाहू ।] [इति] उक्कच्छा । (A, B & C).

---

९० । आसां स्वरूपमाह । लोहाङ्गी सर्व्वलघुर्यत्र गुरवश्चत्वारो भवन्ति सा हंसी । यो यो हारो वर्द्धते नाम यद्यत्र तत्तत्र ॥ हारो गुरुः, चत्वार इति चतुर्गुरुपर्य्यन्ता हंसी । ततश्च गुरुर्वर्द्धते तत्तन्नाम भवति । चतुर्गुरुः हंसीति कथनात् गुरुचतुष्कक्रमाद् वृद्धिर्बोद्धव्या, तेनाष्टावधिगुरू रेखा भवति । एवं ततो द्वादशावधिगुरुस्ताड़ङ्की ततः षोड़शावधिगुरुः कम्पिनी, एवं क्रमेणाष्टाविंशतिगुरुपर्य्यन्ता कालरुद्राणी । ननु इति ऊह्यं, अत्र द्वात्रिंशद्गुरुत्वमपि सम्भाव्यते, यतोऽत्र एकादशकलः पादः, उच्यते इत्यूह्यं, षट्सु पादेषु लघवः षड़ावश्यकाः, षट्षष्टिकलाया उत्कच्छाया लघुशेषे रुद्रशक्तयः सम्भवंति । अत्र च नामान्तरकथनात् सापि कालरुद्राण्येवेति सम्प्रदायः । परे च हंस्यनन्तरमेव एकगुरुवृद्ध्या रेखादयः, तेन दशगुरुः कालरुद्राणीति इतो वृद्धिर्नास्तीति वदन्ति । (C).

९० । अथ प्रस्तारक्रममाह लोहंगिणीति । सव्वलहू — सर्व्वलघुः सर्व्वे षट्पादस्थाः षट्षष्ट्यपि वर्णा लघवो यस्यां सा इत्यर्थः,

---

९० । १ होइ follows णि (F). २ सव्वलऊ (B, C & D), सव्वलघू (F). ३ जत्त (A), जत्थय (B, C & F). ४ गुरु (B, C, D, E & F). ५ चारि होइ (B, C, D & F), एक्क होइ (E). ६ जहि (E). ७ बड्ढइ (B), बद्दइ (C). ८ जोअ (F). ९ तत्त (A). १० ८० (A), ९० (E & F).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

लोहांगिनी भवतीति शेषः, जत्थ — यत्र, एक्क — एकः, गुरु — गुरुः, होइ — भवति सा हंसी। एवं यथा यथा वर्द्धते हारः गुरुः, तथा तथा यत्र यत् नाम, तत्र तत् नाम ज्ञेयमित्यर्थः। अयं भावः — यत्र षट्षष्टिर्लघवः सा लोहांगिनी, यत्रैको गुरुश्चतुःषष्टिर्लघवः सा हंसी, यत्र द्वौ गुरू द्विषष्टिर्लघवः सा रेखा, एवं पूर्वभेदापेक्षया यथा उत्तरत्र भेदे एको गुरुर्वर्द्धते, लघुद्वयं च य[अ]वहीयते, तथा भेदा बोध्याः, ते च लिखित्वा प्रदर्श्यंते। [Here a blank space has not been filled in.—Ed.]

अत्र यद्यपि नवमादयोऽप्यन्ये त्रयोविंशतिर्भेदाः संभवंति बाधकाभावात्तथापि ते ग्रंथकृता नोक्ताः, वस्तुतस्तु तेऽपि सुधीभिरूहनीयाः। तत्र च त्रिंशद्गुरवः षट् लघवो यत्र भवंति सोऽतिमो भेदः, प्रतिच[रण]मेकादशमात्राणामुक्तत्वादेकादशतम एको लघुरवश्यं प्रतिचरणमंतेऽपेक्षित इति बोध्यम्। अत्र क्वचित् जत्थ गुरु चारि होइ सा हंसीति पाठश्च — यत्र गुरुचतुष्टयं भवति सा हंसी, एकगुरुमारभ्य यावत् गुरुचतुष्टयं वर्द्धते तावत्पर्यंतं भेदचतुष्टयं हंसीसंज्ञकमित्यर्थः। अत्रायमाशयः। यत्र चरणषट्के षट्षष्टिर्लघवः पतंति सा लोहांगिनी, यत्रैको गुरुश्चतुःषष्टिर्लघवः [Here apparently something has been omitted.] यत्र च षड्गुरवश्चतुःपंचाशल्लघवः यत्र सप्त गुरवः द्विपंचाशल्लघवः [Here something has been left out] एते चत्वारो भेदा रेखासंज्ञकाः २। यत्र च नव गुरवः अष्टचत्वारिंशल्लघवः, यत्र दश गुरवः षट्चत्वारिंशल्लघवः, यत्र चैकादश गुरवः चतुश्चत्वारिंशल्लघवः, यत्र च द्वादश गुरवः द्विचत्वा-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

रिंशल्लघवः, एषां च चतुर्णां ताडंकिनी संज्ञा ३। यत्र त्रयोदश गुरवः चत्वारिंशल्लघवः, यत्र च चतुर्दश गुरवः अष्टत्रिंशल्लघवः, यत्र च पंचदश गुरवः षट्त्रिंशल्लघवः, यत्र च षोडश गुरवः चतुस्त्रिंशल्लघवः, एषां चतुर्णां कंपिनी संज्ञा ४। यत्र सप्तदश गुरवः द्वात्रिंशल्लघवः, यत्र चाष्टादश गुरवस्त्रिंशल्लघवः, यत्रैकोनविंशतिर्गुरवः अष्टाविंशतिर्लघवः, यत्र विंशतिर्गुरवः षड्विंशतिर्गुरवः[र्लघवः], एषां चतुर्णां गंभीरा संज्ञा ५। यत्रैकविंशतिर्गुरवः चतुर्विंशतिर्लघवः, यत्र द्वाविंशतिर्गुरवो लघवश्च, यत्र त्रयोविंशतिर्गुरवः विंशतिर्लघवः, यत्र च चतुर्विंशतिर्गुरवः अष्टादश लघवः, एषां चतुर्णां काली संज्ञा ६। यत्र पंचविंशतिर्गुरवः षोड़श लघवः, यत्र षड्विंशतिर्गुरवः चतुर्दश लघवः, यत्र सप्तविंशतिर्गुरवः द्वादश लघवः, यत्र षड्विं[अष्टाविं]शतिर्गुरवः दश लघवः, एषां चतुर्णां कालरुद्राणी संज्ञा। अत्रैकगुरुवृद्धिमारभ्यागुरुचतुष्टयवृद्धि प्रथमभेदकरणादुत्तरोत्तरभेदानामपि तथैव विधानमुचितमित्यष्टौ भेदा बोध्याः। अत्रैकोनत्रिंशद्गुर्वष्टलघुयुक्तः त्रिंशद्गुरुषड्लघुयुक्तश्चैतद्भेदद्वयम् अन्यदपि संभवति बाधकाभावात्, ग्रन्थकृता तन्नोक्तं, वस्तुतस्तु तदपि बोध्यम्। अथवा एतदपि भेदद्वयं कालरुद्राणीमध्ये पातनीयम्, एवं च कालरुद्राण्याः षड्भेदा बोध्याः। अथवा यत्र चत्वारो गुरवः अष्टपंचाशल्लघवः सा हंसी, यत्राष्टौ गुरवः पंचाशल्लघवः सा रेखा, यत्र द्वादश गुरवः द्विचत्वारिंशल्लघवः सा ताढ़ंकिनी, यत्र षोड़श गुरवः उदश [चतुस्त्रिंशत्] लघवः सा कालरुद्राणी, अत्र प्रथमं गुरुचतुष्टयवर्द्धनादुत्तरत्रापि तथैव [व]र्द्धनमुचितमिति

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अथ रोला । (D & F).

पढम होइ[1] चउ[2]बीस[3]मत्त गुरु अंतर[4] जुत्ते
पिंगल होंति[5] सेस णाअ[6] तहिं[7] रोला उत्ते[8] ।
एग्गाराहा[9] हारा[10] रोलाछंदो[11] जुज्जइ[12]
एक्के एक्के[13] टुट्टइ[14] अस्सो अस्सो बढ्ढइ[15] ॥ ९१[16] ॥

लोहांगिनीसहिता अष्टौ भेदा बोध्या इत्यस्मत्तातचरणोपदिष्टः पंथा निर्मत्सरैः सुधीभिर्विभावनीयः । (E).

९० । यत्र षट्षष्टिमात्राः सर्वलघुरूपा भवंति चेत्तदा लोहांगिनी । यत्र चत्वारो गुरवोऽष्टपंचाशल्लघवस्तदा हंसी । एवं रेखादीन्यपि नामानि भवन्तीत्यर्थः । केचित्तु अस्य षट्षष्टिकलाचरणांते चैकैकलघोरावश्यकलादवशिष्टानां षष्टिलघूनां मध्ये एकैकगुरुवृद्ध्या लघुद्वयह्रासे त्रिंशद्भेदा भवंतीति तन्नामानि सामान्येनाष्टावुक्तानीत्याहुः ॥ (G).

९१ । रोलाच्छन्दमा[आ]ह ॥ प्रथमे भवन्ति चतुर्विंशतिर्मात्राः गुरवः अन्तरा युक्ताः । पिङ्गलोऽभूत् शेषनागस्तेन रोला उक्ता ।

---

९१ । १ होहिं (E). २ चयो (B), चो (F), ३ वीसे (C). ४ अंतरा (C). ५ होंते (A), होन्ते (D), होंते (E), होवे (F). ६ णाम (D), नाग (E). ७ तषि (B & C), ते यन्ह (D), तेम्ह (E), तह (F). ८ वुत्ते (A, B, C & D). ९ एगार (B), एमारहा (F). १० हारो (B), हा (C). ११ च्छन्दो (C), छंदाहि (F), १२ वुचइ (A), वुज्झइ (B & C). १३ एक्कें एक्कें (D). १४ टुट्टे (B & C), टुटइ (D). १५ बचइ (A, B & C). १६ ८८ (A), ९१ (E), ९० (F).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

एकादश हारा रोलाच्छन्दसि उच्यन्ते, एक एकस्तुटति अन्यदन्य-न्नामोत्तिष्ठति ॥ प्रथमे प्रथमपादे, एवं पादत्रयेऽपि बोध्यम् । अन्तरान्तरा गुरुयोगः कार्य्यः, तत्र स्थाननियमाभावाद् यथेच्छं हारो गुरवः, एकैकपादे एकादश, तत्रैकैकगुरुस्थाने लघुद्वयवशा-द्द्वादश नामानि भवन्ति ॥ (C).

९१ । अथ रोलावृत्तं लक्षयति पढ़म इति । यत्र पढ़म—प्रथमे चरणे, इदं च द्वितीयादीनामप्युपलक्षकं, गुरु अंतर जुत्ते—अंतरा गुरुयुक्ता मध्ये गुरुसंयुक्ता इत्यर्थः, चउवीस मत्त—चतु-र्विंशतिर्मात्राः, होहिं—भवंति, सेस नाग—शेषनागः, पिंगल होंते—पिंगलोऽभूत्, तेन्ह रोला उत्ते—तेन रोला उक्ता, एग्गाराहा हारा—एकादश हारा गुरवः द्विलघुयुक्ता इति शेषः, त्रयोदशाक्षरगणम[स्या]ग्रे वक्ष्यमाणत्वात्, रोला छंदो—रोला-च्छंदसि प्रतिचरणमित्यर्थः, जुज्जइ—युक्ता भवतीत्यर्थः, एक्क एक्क—एकैकः गुरुरिति शेषः, टुट्टइ—त्रुटति ह्रसतीत्यर्थः, अण्णो अण्णो—अन्यः अन्यः लघुरित्यर्थः, बड्ढइ—वर्द्धते, तथाचात्र प्रतिचरणमेकादश गुरवो लघुद्वययुक्ताः पतंति, तत्र चैकैकगुरु-ह्रासेन लघुद्वयवृद्ध्या द्वादशभेदा भवंतीत्यर्थः । एतल्लक्षणनिष्कर्षः । यथैतस्योदाहरणे संगतिस्तथानुपदमेव विवेचयिष्यामः । (E).

९१ । अथ रोला ॥ पढेति ॥ प्रथमं भवंति चतुर्विंशतिर्मात्राः गुरुणा अंतरा युक्ताः । पिंगल-भवता शेषेण नागेन तत्र रोलाया-मुक्ताः ॥ एकादश हारा रोलाच्छंदसि युज्यंते, एक एकस्तुटति अन्योऽन्यो वर्धते ॥ अत्रैकादश गुरवो लघुमिश्राः कार्याः, ते च

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

जहा,

पअभरु[1] दर[2]मरु[3] धरणि[4] तरणि रह[5] धुल्लिअ[6] झंपिअ
कमठ पिट्ठ[7] टरपरिअ[8] मेरु मंदर सिर[9] कंपिअ[10] ।
कोह[11] चलिअ[12] हमीर[13] बीर गअजूह[14] संजुत्ते[15]
किअउ कट्ठ[16] हाकंद[17] मुच्छि[18] मेच्छहके[19] पुत्ते ॥ ९२[20] ॥
[रोला]

गुरवः प्रत्येकचरणे कार्या इति संपूर्णे छंदसि वेति मतद्वयमपि संमतम् । गुरुलघुह्रासवृद्धौ वक्ष्यमाणानि नामानि भवंतीत्यर्थः ॥ ९० ॥ (G).

९२ । उदाहरति । पदभरेण दलमलिता धरणी तरणिरथो धूलिभिराच्छाद्यते, कमठपृष्ठं चलितं, मेरुमन्दरशिरः कम्पते । कोपेन चलितो वीरहम्वीरः गजरथसंयुक्तः, कष्टेन क्षत आक्रन्दो-मूर्च्छिता म्लेच्छकुपुत्रेण ॥ (C).

९२ । रोलामुदाहरति पअभरेति । यदा गअजूह संजुत्ते—गजयूथसंयुक्तः हंमीरवीरः, कोहे चलिअ—क्रोधेन चलितः, तदा

९१ । १ पअभर (B, C, D & E). २ दड (A), मर (F). ३ मर (C), मरि (E), दउ (F). ४ धरणी (B). ५ रथ (B & C). ६ धूल्लिहि (A), धुलिहिँ (B & C), धलिअ (F). ७ पीट्ठ (A), पिट्ठि (B, C & D). ८ दरमलिअ (A). ९ मंद सिर (C). १० कम्पीअ (E). ११ कोहे (B & C), कोहिँ (D), कोहेँ (F). १२ चलइ (B), चलिह (C). १३ हम्मीर (A, D & F), वीर हम्मीर (B & C). १४ गअरह (C), गअजूअ (F). १५ सँजुत्ते (A), सुजुत्तेँ (D), सुजुत्ते (F). १६ कट्टे किअउ (B & C), कट्ठ (D), किएउ कट्ठ (E). १७ आकन्दे (B). १८ मुच्छि (A), मुछिं (D). १९ मेच्छका (B), मेच्छहका (C), मेछिअके (D), मेच्छके (E & F). २० ८९ (A), ९१ (E), ९१ (F).

CC-0. In Public Domain. Funding by IKS-MoE

कुंद करअल[1] मेह[2] तालंक, कररुह[3] कोइल[4] कमलु[5],
इंदु संभु[6] चामरु[7] गणेसरु[8], सहसक्खो[9] सेस भण[10],
णाअ राअ[11] जंपइ[12] फणीसरु[13] ।
तेरह अक्खर जं पलइ इग्गारह[14] वंकेहिँ[15] ।
अक्खर[16] अक्खर[17] जं चलइ[18] तं तं णाम कुणेहि[19] ॥

९३[20] ॥ रड्डा । [इति] रोला । (A).

धरणि — धरणिः, पअभर दरमरि — पादभरेण दलिता वेगधावद्धस्तिहयपत्तिप्रभृतिसेनासमूहचरणघातेन दलितेत्यर्थः, तरणि रह धुल्लिहि झंपिअ — तरणिरथः धूलिभिः प्रयाणोत्थरेणुभिश्छादितः, कमठपिट्ठ टरपरिअ — क[म]ठपृष्ठमधस्तात् गतं, मेरु मंदर सिर कंपीअ — मेरुमंदरगिरिः कंपितं, मेच्छके पुत्ते — म्लेच्छानामपि पुत्रैः, कट्ठ — कष्टं यथा स्यात्तथा, हाकंद — हाक्रंदः, किएउ — कृतः, मुच्छि — मूर्छितं च । अत्र किएउ इत्येकारः एओ सुद्धा वि — इत्युक्तत्वाल्लघुर्बोध्यः, अन्यथा पंचविंशतिमात्रापत्तिः ॥ (E).
[Vide श्लोक ५, p. 7.—Ed.]

९३ । १ कलअल (B). २ मेव (E). ३ कलिरुद्ध (F). ४ किल (A), कोइल (B). ५ कमल (E). ६ चंदु (A, B & C), इंदु omitted and हार added after चामरु in (C). ७ चारुम (D), चामर (E). ८ गणेसर (B). ९ सहसक्ख (A, D & E), सहसक्खो (B), सहसक्क (C). १० भणु (D), भणिअ (E). ११ राज (D). १२ जप्पइ (B). १३ फणेसरु (A). १४ एग्गारह (A), एग्गारह (D & E), अगा and thereafter dropt up to चलइ in (F). १५ गुरु देह (A), गुर देऊ (D), जेहि (E). १६ अक्खरे (B & C). १७ अक्खरे and thereafter dropt up to चलइ in (B). १८ पलइ (D). १९ मुणेह (A), सुणेऊ (D), विआणेऊ (F). २० ९० (A), ९२ (F).

Digitized by eGangotri and Sarayu Trust.

९२। यथा॥ पद्य॥ पदभरेण मर्द्दिता धरणी तरणिरथो-धूल्या आच्छादितः। कमठपृष्ठमधः पतितं मेरुमंदरयोः शिरः कंपितम्॥ कोपेन चलिते हम्मीरवीरे गजयूथसंयुक्ते। कृतः कष्ट-आक्रंदः मूर्च्छितं मे[ले]च्छानां पुत्रैः॥ ९१॥ (G).

९३। नामान्याह। कुन्दकरतलमेघताराङ्ककालरुद्रकोकिल-कमलानि, चन्द्रचामरहारगणेश्वरान् सहस्राचं शेषं भण, नागराजो जल्पति फणीश्वरः॥ त्रयोदशाक्षराणि यत्र पतन्ति एकादशवक्रैः गुरुभिः। एतेन एकादश गुरवो, लघु[द्वयम्]। अक्षरे अक्षरे चलति यदि तत्तन्नाम कुरु॥ (C).

९३। अथैतद्भेदानयनप्रकारं तेषां च नामानि रड्डावृत्तेनाह, कुंद करअलेति। जेहि—येषु, एग्गारह गुरु—एकादश गुरवः, एवंभूतानि, तेरह अक्खव[र]—त्रयोदशाक्षराणि, जं—यत्र, पलइ—पतंति, त्रयोदशाक्षरमध्ये एकादश चेत् गुरवस्तदोर्वरित-मक्षरद्वयं तल्लघुरूपमित्यर्थाच्चिप्तं, तथाच द्विलघुयुक्ता एकादशगुरवः एवं प्रतिचरणं यत्र त्रयोदशाक्षराणि पतंतीत्यर्थः, तेषु यदि अक्खर अक्खर—अक्षरमक्षरमेकैको गुरुरित्यर्थः, जं चलइ—यत्र चलति ह्रसतीत्यर्थः, तदा कुंदं १, करतलं २, मेघः ३, ताढंकः ४, काल-रुद्रः ५, कोकिलः ६, कमलं ७, इंदुः ८, शम्भुः ९, चामरं १०, गणे-श्वरः ११, सहस्राक्षः १२, इति, तं तं—तत्तत् नाम, कुणेहि—कुरु इति नागराजः फणीश्वरः शेषः पिंगलः, जंपइ—जल्पति इति, भणिअ—भणितं पूर्वाचार्यैरिति शेषः। इदमत्र तत्त्वम्,—रोलायां चतुर्विंशतिर्मात्राः प्रतिचरणं देया इत्यावश्यकं, तत्र प्रकारद्वयेन

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

संभवति, लघुद्वययुक्तैकादशगुरुदानेन, यथेच्छं गुरुलघुदानेन वा। एवं च पूर्वं लक्षणद्वयं कृतमिति बोध्यं, तथाहि पढमेति पूर्वार्द्धेनैकं, एग्गाराहा हारा इत्युत्तरार्द्धेन च द्वितीयं। तत्र यदि यथाकथंचिच्चतुर्विंशतिर्मात्रा अंतरा अंतरा गुरुयुक्ताः क्रियंते, तदा रोलावृत्तं भवतीति प्रथमलक्षणार्थः। यदि च लघुद्वययुक्तैकादशगुरुभिस्चतुर्विंशतिर्मात्राः क्रियंते, तदापि रोलावृत्तं भवतीति द्वितीयलक्षणार्थः। तत्र पअभ इत्युदाहरणं प्रथमलक्षणाभिप्रायेण, भेदानयनप्रकारस्य द्वितीयलक्षणाभिप्रायेण प्रदर्शितमित्यवधेयम्।

एवं च यत्रैकादश गुरवः अंते च द्वौ लघू, एवं त्रयोदशाक्षराणि चतुर्विंशतिर्मात्राश्च प्रतिचरणं पतंति सः कुंदः, यत्र दश गुरवः एवं चतुर्दशाक्षराणि चतुर्विंशतिर्मात्राश्च प्रतिचरणं पतंति सः करतलम्, एवं पूर्वभेदापेक्षया उत्तरत्र भेदे एकगुरुन्यूनक्रियया लघुद्वयमेकमक्षरं च वर्द्धते तदा ते ते भेदा ज्ञेयाः, ते लिखित्वा प्रदर्श्यंते। [There is a blank space here]. यदा पूर्वोक्तमेकमेव लक्षणं, तत्र च कथमंतरांतरा गुरुयोगः कर्त्तव्य इत्यपेक्षायामाह एग्गाराहा हारेति, तथा च द्विलघुयुक्तैकादशगुरुषु एकैकगुरुह्रासेन लघुद्वयवृद्ध्या अंतरांतरा गुरुयोगस्य कर्त्तव्य इति भावः। न चैवं सत्युदाहरणासंगतिरिति वाच्यमव्यवहितपूर्वोक्ते रसिकानामके वृत्ते इवात्रापि भेदकरणात्। [Vide श्लोक ९०, p. 153.—Ed.]

तथाहि यत्र चरणचतुष्टयपिंडीभूतास्चतुश्चत्वारिंशद्गुरवः अष्टौ लघवः, यत्र च त्रयश्चत्वारिंशद्गुरवो [दश लघवः, यत्र च द्विचत्वारिंशद्गुरवो] द्वादश लघवः, यत्र च एकचत्वारिंशद्गुरवस्चतुर्दश

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

लघवः, एषां चतुर्णां कुंदसंज्ञा । एवं चत्वारिंशद्गुरुषोडशलघुकमारभ्य सप्तत्रिंशद्गुरुद्वाविंशतिलघुकपर्यंतं चतुर्णां करतलसंज्ञा २। एवं षट्त्रिंशद्गुरुचतुर्विंशतिलघुकमारभ्य त्रयस्त्रिंशद्गुरुत्रिंशल्लघुकपर्यंतं चतुर्णां मेघसंज्ञा ३। एवं द्वात्रिंशद्गुरुद्वात्रिंशल्लघुकमारभ्य एकोनत्रिंशद्गुरु-अष्टत्रिंशल्लघुकपर्यंतं चतुर्णां ताढंकसंज्ञा ४। एवमष्टाविंशतिगुरुचत्वारिंशल्लघुकमारभ्य पंचविंशतिगुरुषट्चत्वारिंशल्लघुकपर्यंतं चतुर्णां कालरुद्रसंज्ञा ५। एवं चतुर्विंशतिगुरु-अष्टचत्वारिंशल्लघुकमारभ्य एकविंशतिगुरुचतुःपंचाशल्लघुकपर्यंतं चतुर्णां कोकिलसंज्ञा ६। एवं विंशतिगुरुषट्पंचाशल्लघुकमारभ्य सप्तदशगुरुद्विषष्टिलघुकपर्यंतं चतुर्णां कमलसंज्ञा ७। एवं षोडशगुरुचतुःषष्टिलघुकमारभ्य त्रयोदशगुरुसप्ततिलघुकपर्यंतं चतुर्णां इंदुसंज्ञा ८। एवं द्वादशगुरुद्विसप्ततिलघुकमारभ्य नवगुरु-अष्टसप्ततिलघुकपर्यंतं चतुर्णां शम्भुसंज्ञा ९। एवमष्टगुरु-अशीतिलघुकमारभ्य पंचगुरुषडशीतिलघुकपर्यंतं चतुर्णां चामरसंज्ञा १०। एवं चतुर्गुरु-अष्टाशीतिलघुकमारभ्य एकगुरुचतुर्णवतिलघुकपर्यंतं चतुर्णां गणेश्वरसंज्ञा ११। एवं सर्वलघुः सहस्राचः १२। इत्थं च भेदानयनप्रकारः।

जेहि—येषु एग्गारहगुरु—एकादशगुरुकः द्वौ लघू, एवंभूतानि जं—यत्र तेरह अक्खर—त्रयोदशाक्षराणि पलइ—पतंति, इत्थं यत्र चरणचतुष्टये द्विपंचाशदक्षराणि स्थापयित्वेति शेषः, अक्षरमक्षरं एकैको गुरुः यावद्गुरुचतुष्टयं ह्रसति तदा कुंदादि तत्तन्नाम कुरु इति व्याख्येयम्। एवं द्वा[एक]विंशतिगुरुयुक्तं

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

पञ्चभरेत्युदाहरणं [Vide श्लोक ९२, p. १५७।—Ed.] कोकिलाख्य-षष्ठभेदाभिप्रायमिति सर्वं सुस्थमित्यस्मत्तातचरणोपदिष्टः पंथाः सुधीभिर्विभावनीयः।

कश्चित्तु [* * *] त्रयोदशगुरु १ ल [?] कालरुद्रः, यत्राष्टौ गुरवोऽशीतिर्लघवः स कोकिलः, यत्र सप्त गुरवो द्व्यशीतिर्लघव-स्तत्कमलं, यत्र षड्गुरवश्चतुरशीतिर्लघवः स इंदुः, यत्र पंच गुरवः षडशीतिर्लघवस्तच्चामरं, [* * *] यत्र त्रयो गुरवो नवतिर्लघवः स गणेश्वरः, यत्र गुरुद्वयं [द्वि]नवतिर्लघवः स सहस्राक्षः, यत्रैको-गुरुश्चतुर्णवतिर्लघवः स शेषनामा त्रयोदशतमो भेदः, इत्थं शेषइति नामवाचकमेव मत्वा त्रयोदशभेदानाह। तदनवधानात् इत्थं भेदानयनस्य ग्रंथादनुपलब्धेः, यतः प्रतिचरणं लघुद्वययुक्तैकादश-गुरुषु चरणचतुष्टयसमुदितचतुश्चत्वारिंशद्गुरुषु वा एकैकगुरुह्रासेन लघुद्वयवृद्ध्या भेदानयनं ग्रंथस्वारस्येन प्रतिपत्तेः, न तु त्रयोदश-गुरुषु स्वेच्छया। इत्थं यथाकथंचित् षण्णवतिमात्रामवलंब्य भेदकरणे विंशतिर्गुरवः षट्पंचाशल्लघवस्तेषु एकैकगुरुह्रासेन विंशतिर्भेदा-श्चायांति। एवं त्रिंशद्गुरवः[रुषु] षट्त्रिंशद्गुरुषु वा एकैकगुरुह्रासेन लघुद्वयवृद्ध्या भेदानयनं ग्रंथस्वारस्येन प्रतिपत्तेः न तु त्रयोदश-गुरुत्रिंशद्भेदा [?] भवंति। एवं यथाकथंचित्तावन्मात्रामात्रपूर-कतावत्तावद्गुरुलघ्वापादनेन यथारुचि तावत्तावद्भेदापत्तेर्दुर्वारत्वात्, त्वदुक्तरीत्या चतुर्दशतमभेदापत्तिरपि दुर्वारा, तर्ह्येको गुरुराव-श्यको येन गुरुराहित्येन गाथायामिवात्राप्यनिष्टमापद्येत उदा-हरणासंगतिश्च स्पष्टैवेति विभावनीयं वक्ष्यमाणकाव्यच्छन्दसस्त्वाप्याय-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अथ गंधाना । (D).

दहसत्त वस पढमपत्र भणह[१] सुत्रणा
तह बीत्रम्मि[२] अट्ठारहहिँ[३] जमत्र[४] जुत्र चरणा ।
एरिसित्र[५] बीत्र[६] दल कुणहु[७] भणइ पिंगलो[८]
गंधाणा[९] णाम रूत्रउ[१०] हो[११] पंडित्र जण[१२] चित्तहलो[१३] ॥
९४[१४] ॥ [गंधाण]

मेव भेदः यत्काव्ये लघुद्वयं जगणाद्यंतर्गतं मध्ये पतति, अत्र तु यथेच्छमिति । (E).

९३ । रोलानामान्याह ॥ कुंदेति ॥ कुंदं १, करतलं २, मेघः ३, तालंकः ४, कलिरुद्रः ५, कोकिलः ६, कमलं ७, इंदुः ८, शंभुः ९, चामरं १०, गणेश्वरः ११, सहस्राचः शेषो भण नागराजो जल्पति फणीश्वरः ॥ त्रयोदशाचराणि यत्र पतंति अग्रे तत्तन्नाम विजानीहि ॥ अत्र द्विलघुमारभ्य चतुर्विंशतिलघुपर्यंतं द्वादश कुंदादीनि नामानि भवंतीति केचित् ॥ सहस्राचः सहस्रभुज इति शेषं विशिष्य एकादशनामानीति इतरे । रोलेति सर्वगुरोर्नामेति केचित् ॥ (G).

---

९४ । १ सुणह (A), भणह (C), कुणउ (F). २ विअम्मि (D), बीअंमि (E). ३ अठारहिँ (A), अठारहह (E), उट्ठारहहि (F). ४ जमजुअ (B). ५ एरिस (A), एरिसअ (B), एरीसअ (C), एरिसं (F). ६ विअ (A). ७ कुणह (A & B), कुण (C). ८ पिंगल (A). ९ गंधाण (B & E), गंधा (C). १० रूअअणु (A), रूअओ (B & C), इअ (E). ११ होइ (A & E). १२ जणं (E). १३ चित्तहरणा (A), चित्तहरा (B & C), चित्तंहलो (D). १४ ९१ (A), ९४ (E), ९२ (F).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

दह सत्तक्खर[1] संठबहु पढमचरण गंधाण ।
बीअक्खर[2] पुणु[3] जमअ दइ[4] अट्ठारहइ[5] विआण ॥ ९५[6] ॥
दोहा ।

---

९४ । दशसप्तवर्णान् प्रथमपादे भणत संस्थापयत हे सुजनाः, तथा द्वितीयेऽष्टादशवर्णाः, यमकयुतश्चरणाः । चरणः पादः । एतादृशञ्च द्वितीयार्द्धं कुरुत——भणति पिङ्गलो गन्धनाम रूपकं छन्दः भवति पण्डितचित्तहरम् ॥ (C).

९४ । अथ गंधाननामकं वृत्तं लक्षयति दहसत्त बसेति । हे सुअणा—सुजनाः पढमपअ—प्रथमपादे दहसत्त—सप्तदश बस—वर्णान् भणह—भणत, तह—तथा, बीअंमि—द्वितीयेऽपि, जमअजुअचरणा—यमकयुते चरणे, अठारहइ—अष्टादशैव वर्णान्, भणतेति पूर्वेणान्वयः । एरिसिअ बीअ दल कुणऊ—एतादृश-मेव बीअ दल—द्वितीयं दलम् उत्तरार्द्धमिति यावत् कुणऊ—कुरुत, तृतीयचरणं सप्तदशवर्णयुक्तं चतुर्थं चाष्टादशवर्णयुक्तमिति यावत् । इअ—इदं, पंडिअजण चित्तहरो—पंडितजनचित्तहरं, गंधाण णाम—गंधाननामकं वृत्तं होइ—भवति इति पिंगलो—पिंगलः भणइ—भणति ॥ ९४ ॥ (E).

९४ । अथ गंधाण ॥ दहेति ॥ दशसप्तवर्णाः प्रथमे पदे कुरुत

---

९५ । १ सत्त अक्खर (C). २ बीअ अक्खर (A), बीए (B), बिअ अक्खर (E), बीए पुण (F). ३ पुण (E & F). ४ देइ (A & E), जमअं दइअ (F). ५ अट्ठारहउ (B & C), अट्ठारहहि (F). ६ ९१ (A), ९५ (E), ९४ (F).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

जहा, कम्म चलंते कुम्म चलइ पुणबि[1] असरणा
कुम्म चलंते महि[2] चलइ भुअण[3] भअ करणा ।
महिअ चलंते महिहरु तह[4] असुर[5]अणा
चक्कबइ[6] चलंते चलइ चक्क[7]तह[8] तिहुअणा ॥ ९६[9] ॥
गंधाण[10] । (A).

सुजनाः । तथा द्वितीयेऽष्टादश एवं यमकयुगचरणाः ॥ पु[न-]स्तादृशं द्वितीयदलं कुरुत भणति पिंगलः । गंधाननाम रूपकं भवति पंडितजनचित्तहरम् ॥ ९३ ॥ (G).

९५ । दशसप्ताक्षराणि संस्थापय प्रथमचरणे गन्ध[न्धा]नायाः । द्वितीयेऽष्टादशाक्षराणि पुनर्यमकं देहि विजानीहि ॥ (C).

९५ । अथ गंधानकमेव दोहावृत्तेन स्पष्टयति दहसत्तक्खरेति । पढमचरण – प्रथमचरणे, गंधाण – गंधानस्य, दहसत्तक्खर – सप्तदशाक्षराणि संठवहु – संस्थापयत, बिअ – द्वितीये चरणे, अक्खर – अक्षराणि पुनः, अट्ठारहइ – अष्टादशैव, जमअ देइ – यमकं दत्त्वा, बिआण – विजानीहि ।

अत्र च वर्णनियम एव न तु मात्रानियम इति बोध्यम् । ९५ । (E).

[It would have been better placed in the 2nd part among (वर्णवृत्तं) Varṇavṛittas.—Ed.]

---

९६ । १ पुहवि (D). २ मही (F). ३ भुअ भअ (A). ४ चलइ तहा (A), त तेहिं (E). ५ सुर (E). ६ चक्कवई (D). ७ चक्कु (A). ८ जह (B & C), जेहुं (E). ९ ९३ (A), ९६ (E & F). १० गंधाणा (B & C).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

९५। दोहया पुनस्तदेवाह ॥ दहेति ॥ सप्तदशाक्षराणि स्थापय प्रथमे चरणे गंधानस्य। द्वितीये पुनर्यमकं दत्त्वा अष्टादश अक्षराणि विजानीत ॥ ९४ ॥ (G).

९६। उदाहरति। यथा राजविशेषे कर्णे चलति कूर्म्मस्खलति, पुनरपि अशरणे कूर्म्मे चलति सति मही चलति भुवनभयकरी। मह्यां चलन्त्यां महीधरास्खलन्ति, सुरगणास्खलन्ति, चक्रवर्त्तिचलने चलति चक्रवद्यावत्त्रिभुवनम् ॥ (C).

९६। अथ गंधानमुदाहरति कस इति। चक्कवइ — चक्रवर्त्तिनि कस — कर्णे चलंते — चलति सति, कुम्म चलइ — कूर्मस्खलति, कुम्म चलंते — कूर्मे चलति सति, असरणा — अशरणा कूर्मचलनादधिष्ठानरहितेति भावः, भुअण भअ करणा — भुवनभयकर्त्री पुणवि — पुनरपि महि चलइ — मही चलति, महिअ चलंते — मह्यां चलंत्यां, [महिहरु] — महीधरः मेरुः चलतीति पूर्वेणान्वयः। सामान्यवचनमपि महीधरपदं विशेषपरं बोध्यम्। तेहि — तस्मिन् महीधरे चलति सति, सुरअणा — सुरगणस्खलति, मेर्वधिष्ठानत्वात् सुरगणस्येति भावः, एवं जेऊं चक्क — यथा चक्रं तथा तिऊअणा — त्रिभुवनं चलति। अत्र जेऊं इति एकारो लघुर्वाच्यः [?] ॥ ९६ ॥ (E).

९६। यथा ॥ कश्चित्कर्णं स्तौति ॥ कर्णे चलिते कूर्मस्खलति पुनरपि अशरणः, कूर्मे चलति मही चलति भुवनभयकारिणी। मह्यां चलंत्यां महीधरास्तथा असुरगणाः, चक्रवर्तिनि चलिते चलति चक्रं तथा त्रिभुवनम् ॥ ९६ ॥ (G).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अथ चौ[चउ]पइआ।

चउपइआ छंदा भणइ फणिंदा
चउमत्ता गण[1] सत्ता,
पाएहि[2] सगुरु[3] करि[4] तीस मत्त धरि
चउ सअ असिअ णिरुत्ता।
चउ छंद लबिज्जइ[5] एक्कु[6] ण किज्जइ
को जाणइ एहु[7] भेउ[8],
कइ[9] पिंगल भासइ छंद पआसइ
मिअणअणि अमिअ[10] एहु[11] ॥ ९७[12] ॥

९७। चतुष्पदं छन्दः भणति फणीन्द्रः चतुर्मात्रिकाः सप्तगणाः भवन्ति पादे पादे सगुरुं कृत्वा एवं त्रिंशन्मात्रा धार्य्यन्ते। चतुश्चरणसंख्यामाह, चत्वारिंशता [चतुःशतं] अशीतिर्निरुक्ता, एतच्छन्दश्छन्दश्चतुष्टयेन लभ्यते, एकेन पादेन क्रियते, को जानाति इमं भेदं, कविः पिङ्गलो भाषते, हे मृगनयने अमृतमेतत् ॥ (C).

९७। अथ चतुःपादिकां लक्षयति चउपइआ इति। पाएहि—पादे एकैकचरणे इत्यर्थः, चउमत्ता—चतुर्मात्रिकान्, [गण सत्ता]—गणान् सप्त, सगुरु करि—सगुरून् कृत्वा, गुरुयुक्तान्

९७। १ गणा (E). २ पाए (A, B & C). ३ सगुरू (F). ४ करु (D). ५ लेकिज्जइ (E). ६ एक्क (B & C). ७ एह (A), एउ (F), ए should be read as short, vide श्लोकः ५, p. 7—Ed. ८ भेउ (B, D & F), भेख (E). ९ कहि (B). १० अवि (A). ११ एऊ (B, C & D), एउ (E & F). १२ ९४ (A), ९० (E & F).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

सप्तचतुर्मात्रिकान् गणान् विधायेत्यर्थः, एवं तीस मत्ता धरि—त्रिंशन्मात्रा धृत्वा, चउपइआ छंदा—चतुःपादिकाच्छन्दः, फणिंदा—फणीन्द्रः पिंगलः भणइ—भणति। तत्र विशेषमाह चउछंदेति। इदं वृत्तं चतुश्छंदांसि लेकिज्जइ—गृहीला क्रियते, एक्क—एकं छंदः गहीला ण किज्जइ—न क्रियते, वृत्तचतुष्टयेनैकं पद्यं विधेयं, न त्वेकेनैव वृत्तेन। तथाच षोडशचरणैरिदं कर्त्तव्यं, न तु चतुर्भिश्चरणैरिति भावः। एवं चात्रेति शेषः, चउसअ-असिअ—चतुश्शतमशीतिस्र मात्रा इति शेषः, णिरुत्ता—निरुक्ताः कथिता-इत्यर्थः, मिअणअणि—हे मृगनयने, एऊ भेअ—एतं भेदं, को जाणइ—कः पिंगलातिरिक्तः जानाति, एअ[उ]—एतच्छंदः [अमिअ]—अमृततुल्यमित्यर्थः, पआसइ—प्रकाशते इति कइ—[कविः] पिंगलो भाषते। अत्र चतुर्मात्रिकसार्द्धसप्तगणात्मकचरणं चतुर्गुणीकृ[त्वे]त्यर्थः एकश्चरणो विधेयः, एवं चत्वारश्चरणा विधेया-इति फलितार्थः ॥ ९७ ॥ (E).

९७। अथ चतुःपदिकाच्छन्दः ॥ चउ इति ॥ चतुःपदिका-च्छन्दो भणति फणीन्द्रश्चतुर्मात्रान् गणान् सप्त पादे सगुरून् कुरु। त्रिंशन्मात्रा धारय ॥ जायते युवमिति शेषः [?] ॥ चतुःशतमशी-तिर्निरुक्ता ॥ चतुश्छंदांसि लेख्यंते ॥ एकं न क्रियते ॥ को जाना-त्येतान् भेदान् कविः पिंगलो भाषते, छंदः प्रकाशते, मृगनयने अमृतमेतत् ॥ चतुःपदीच्छन्दोऽशीत्यधिकचतुःपंचशत[चतुःशत]मा-त्राकं षोडशचरणं कार्यं, चतुश्चरणं न प्रयोज्यमित्यर्थः ॥ त्रिंशदंके षोडशगुणिते सं ४८० ॥ (G).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

जहा, जसु[1] सीसइ[2] गंगा गोरि अधंगा
गिव[3] पहिरिअ[4] फणिहारा,
कंठट्ठिअ बीसा[5] पिंधण दीसा
संतारिअ संसारा ।
किरणाबलि कंदा[6] बंदिअ[7] चंदा
णअणहि अणल[8] फुरंता,
सो संपअ[9] दिज्जउ[10] बहु सुह किज्जउ[11]
तुह्म[12] भवाणीकंता ॥ ९८[13] ॥
चउपइआ । (A, B & C).

९८ । उदाहरति । यथा, यस्य शीर्षे गङ्गा गौरी अर्द्धाङ्गे ग्रीवाप्र[परि]धानं फणिहारः, कण्ठस्थितं विषं, परिधानं दिक्, संसा[ता]रितसंसारः । किरणावलिकन्दो वन्दितचन्द्रः नयनेऽनलः स्फुरति, स मङ्गलं करोतु, बहु सुखं ददातु तव भवानीकान्तः ॥ किरणावलीनां कन्दः मूलं, वन्दितस्तिलकीकृतश्चन्द्रो येन सः तथा । (C).

९८ । चतुःपादिकामुदाहरति जसु सीसहि इति । जसु

९८ । १ जासु (F). २ सीसे (A), सीसइ (D), सीसहि (E), सीस (F). ३ गिअ (A), गिम (B & C). ४ पिंधिअ (A), पिन्धण (B & C), परिहिअ (F). ५ विसा (C). ६ वन्दा (B). ७ णंदिअ (D & F). ८ णअल (F). ९ मंगल (A, B & C). १० किज्जउ (C). ११ दिज्जउ (C). १२ तुम्ह (B, C, D & F). १३ ९५ (A), ९८ (E & F).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अथ घत्ता । (D & F).

पिंगल कइ दिट्ठउ[1] छंद उकिट्ठउ[2]
घत्त मत्त बासट्ठि[3] करि ।
चउ[4] मत्त सत्त गण बे बि पाअ भण
तिस्सि तिस्सि लहु अंत धरि ॥ ९९[5] ॥

सीसहि गंगा—यस्य शीर्षे गंगा शोभितेति शेषः, यस्स गोरि अधंगा—गौर्यर्द्धांगः गौरी अर्द्धांगे यस्य तादृश इत्यर्थः, गिव पहिरिअ फणिहारा—ग्रीवापरिधृतफणिहारः ग्रीवायां परिधृताः फणिहारा येन तादृश इत्यर्थः, कंठट्ठिअ बीसा—कंठस्थितविषः, पिंधणदीसा—दिक्पिंधनः दिक् पिंधनमाच्छादनं यस्य स इत्यर्थः, संतारिअ संसारा—संतारितः संसारः येन च, किरणावलिकंदा—किरणावलिकंदः, वंदिअ—वंदितः चंदा—चंद्रः भाले धृत-इत्यर्थः, यस्य च णअणहि—नयने तृतीये नेत्रे अणल फुरंता—अनलः स्फुरन्नस्तीति शेषः, सो—सः भवाणीकंता—भवानीकांतः शिवः, तुह्म—युष्मभ्यं संपअ दिज्जउ—संपदं दद्यात्, बहु सुह किज्जउ—बहु सुखं कुरुतात् । अत्र एक एव चरण उदाहृतः, एतादृशा अन्ये त्रयश्चरणाः सुधीभिः स्वयमुदाहरणीयाः ॥ ९८ ॥ (E).

९८ । तत्र चरणोदाहरणं यथा ॥ जस्सु इति ॥ यस्य शीर्षे गंगा गौरी अर्धांगे ग्रीवापरिधृतफणिहारः कंठस्थितविषः पिंधनदिक्

९९ । १ दिट्ठउ (B & C). २ उकिट्ठउ (B & C), उक्किट्ठउ (F). ३ वासट्ठि (B & C). ४ चौ (E & F). ५ ९९ (A), ९९ (E), ९८ (F).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

पढमं दह बीसामो[1] बीए मत्ताइँ अट्ठाइँ[2] ।
तीए तेरह बिरई[3] घत्ता मत्ताइँ बासट्ठि[4] ॥ १००[5] ॥

गाह्न ।

संतारितसंसारः ॥ किरणावलिकंदो नंदितचंद्रो नयनेऽनलः स्फुरति, स संपदं ददातु बहु सुखं करोतु युष्माकं भवानीकांतः ॥ ९८ ॥ (G).

९९ । अथ घत्ताच्छन्दः । पिङ्गलकविदृष्टं छन्द उत्कृष्टं घत्ता द्विषष्टिः मात्राः कार्य्याः, चतुर्मात्रान् ग्रन्द[सप्त] गणान् द्वयोरपि पदयोः त्रीन् त्रीन् लघूनन्ते धृत्वा ॥ (C).

९९ । अथ घत्तानामकं वृत्तं लक्षयति पिंगल कइ इति । बे बि पाअ — द्वयोरपि पादयोः, तिणि तिणि लहु — त्री[न् त्रीन्] लघून्, अंत धरि — अंते पदांत इति यावत् धरि — धृत्वा, चउमत्त सत्त गण — चतुर्मात्रिकान् सप्त गणान् भण — कथय, एवं बासट्ठि मत्त — द्विषष्टिर्मात्राः करि — कृत्वा, छंद उकिट्ठउ — छंदसूत्कृष्टां, पिंगल कइ दिट्ठउ — [पिंगलकवि-]दृष्टां, घत्त — घत्तां जानीहीति शेषः । अयमर्थः — घत्ता द्विपदी, तत्र चतुर्मात्रिकसप्तगणानंतरं लघुत्रयं प्रत्येकं विधेयमिति ॥ ९९ ॥ (E).

९९ । अथ द्विपदी घत्ताच्छन्दः । पिंगलेति ॥ पिंगलकविदृष्टं

---

१०० । १ विस्सामो (B & C). २ अट्ठाइँ (B & C), अट्ठाहि सुमत्ताहि (F). ३ विरइ (A, B & C). ४ बासट्ठी (B & C), बासट्ठो (D). ५ ९७ (A), १०० (E), ९९ (F).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

जहा, रणदक्ख दक्ख हणु जिसु[1] कुसुमधणु
अंधअ गंध[2] बिणासकरु ।
सो रक्खउ संकरु[3] असुर भअंकरु
गिरिणाअरि अड्ढंग[4] धरु ॥ १०१[5] ॥

घत्ता । (A, B & C).

छंद उत्कृष्टं घत्तां मात्राद्विषष्ठ्या कुरु ॥ चतुर्मात्राः सप्त गणाः द्वयोरपि पादयोर्भण, त्रयस्त्रयोलघवोऽन्ते धार्याः ॥ ९८॥ (G).

१०० । अत्र विरतिमाह । प्रथमं दशसु विश्रामः, द्वितीये मात्रास्वष्टसु, तृतीये मात्रासु त्रयोदशसु विरतिर्घत्तामात्राः द्विषष्टिः ॥ दशमात्रानन्तरं प्रथमो विरामः, ततोऽष्टमात्रानन्तरं द्वितीयः, ततः त्रयोदशमात्रानन्तरं तृतीयः । एवं द्वितीयपादेऽपि । एवं क्रमेण एकपादे एकविंश[त्रिंशत्]मात्राः द्वितीये चैकत्रिंशदिति द्विषष्टिर्मात्राः, द्विपदी घत्ता, तदिदमुक्तं बे वि पाअ भणेति ॥ (C). [Vide *śloka* 99.—Ed.]

१०० । अथ घत्तायां यतिनियममाह पढममिति । [पढमं]—प्रथमं, दह वीसामो—दशसु मात्रासु विश्रामः, बीए—द्वितीये स्थाने अट्ठाइ मत्ताइ—अष्टसु मात्रासु विश्राम इति पूर्वेणान्वयः, तीए—तृतीये तेरह—त्रयोदशसु मात्रासु, बिरई—विरतिः,

---

१०१ । १ जिषि (B), जिनषु (D). २ कन्ध (C), अंधअंधकगंध (E). ३ व dropt in (D). ४ अधधङ्ग (B), गोरिणारि अड्ढंग (D), गोरिणारि अड्ढंग (E), गोरिणारि अंधंग (F). ५ ९८ (A), १०१ (E), १०० (F).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अथ घत्तानंद । (D).

सो घत्तह[1] कुलसारु कित्ति अपारु[2]
णाअराअ पिंगल कहइ[3] ।
एआरह बीसाम[4] णंदउ णाम
पुणुबि[5] सत्त तेरह बिरइ ॥ १०२[6] ॥

एवं घत्ता — घत्तायां मत्ताइ बासट्ठि — मात्राः द्विषष्टिः भवंतीति शेषः । यतिक्रथ[न]क्रमेणैकत्रिंशन्मात्रा लभ्यंते, ताश्च द्वयोर्दलयोः प्रत्येकं देया इति संभूय द्विषष्टिमात्रिका घत्ता भवतीति भावः ॥ १०० ॥ (E).

१०० । पढेति ॥ प्रथमो दशसु विश्रामो द्वितीयोऽष्टसु मात्रासु । तृतीयस्त्रयोदशसु विरतिर्घत्तायां मात्रा द्विषष्टिः ॥ ९९ ॥ (G).

१०१ । उदाहरति । यथा, रणदचदचहन्ता जितकुसुमधनुः अन्धकस्कन्धविनाशकरः । स रचतु शङ्करः असुरभयंकरः गिरिनागर्य्यर्द्धाङ्गधरः ॥ (C).

१०१ । अथ घत्तामुदाहरति रणदक्खेति । येन रणदक्ख — रणदक्षः संग्रामकुशल इति यावत्, दक्ख — दक्षः, हनु[ण] — हतः, येन च कुसुमधणु — कुसुमधन्वा कंदर्पः जिणु — जितः, यस्य अंधअ गंध विणासकरु — अंधगंधविनाशकरः, गिरिणअरि अद्धंग धरु — गिरिनागर्यर्द्धांगधरः गिरिनागरी पार्वती अर्द्धांगे धरति यस्तादृश-

. १०२ । १ घत्ता (F). २ अपार (E). ३ भणइ (A). ४ बिस्साम (B & C), बौस्सम (E). ५ पुणवि (A & E). ६ ९९ (A), १०२ (E), १ (F).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

इत्यर्थः, असुर भअंकरु — असुरभयंकरः, सः शंकरः रक्खउ — रक्षतु मामिति शेषः ॥ १०१ ॥ (E).

१०१ । रणेति ॥ रणदक्षो दक्षो हतो जितः कुसुमधनुः अंधकासुरगंधविनाशकरः । स रक्षतु शंकरोऽसुरभयंकरो गौरीनार्धाङ्गधरः ॥ १०० ॥ (G).

१०२ । अथ घत्तानन्दच्छन्दः । स घत्ताकुलसारः कीर्त्त्यापारः नागराजः पिङ्गलः कथयति । एकादशसु विश्रामः नन्दनामा पुनरपि सप्तसु त्रयोदशसु विरतिः ॥ पूर्वं दशादिमात्रासु विराम उक्तः, अत्र एकादश इति विशेषः । घत्ताकुलसारत्वकथनात् नन्दनामकथनाच्च घत्तानन्देति नाम लभ्यते । (C).

१०२ । अथ घत्तानंदं लक्षयति सो घत्तह कुलेति । यत्र प्रथमं एआरह बीसाम — एकादशसु मात्रास्विति शेषः, अग्रेऽपि योजनीयः, बीसाम — विश्रामः, पुणवि — पुनरपि द्वितीये तृतीये च स्थाने इत्यर्थः, सत्त तेरह — सप्तसु मात्रासु त्रयोदशसु मात्रासु च, बिरइ — विरतिर्भवतीति शेषः, [सो—]तत् घत्तह कुलसार[रु] — घत्तानामकं यद्वृत्तं तज्जातिश्रेष्ठमित्यर्थः, णंदउ णाम — नंदनामकं वृत्तं विद्धि इति शेषः । इति कित्ति अपार — अपारकीर्त्तिर्नागराजः पिंगलः कहइ — कथयति ॥ १०२ ॥ (E).

१०२ । घत्ताया यतिभेदेन नामान्तरमाह ॥ सो घेति ॥ सां[तां] घत्तां कुलसारां कीर्त्त्यापरां नागराजः पिंगलः कथयति । एकादशविश्रामादनाम्नीं, पुनरपि सप्तत्रयोदशविरतिं तां घत्तां घत्तानंदनाम्नीं पिंगलः कथयतीत्यर्थः ॥ १ ॥ (G).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

छक्कलु आइहिँ संठबहु तिण्णि चउक्कल देहु ।
पंचक्कल[1] चउकल[2] जुअल घत्ताणंद मुणेहु[3] ॥ १०३[4] ॥

दोहा ।

---

१०३ । विशेषान्तरमाह, षट्कलमादौ संस्थापय, त्रीन् चतुष्कलान् देहि, पंचकल-चतुष्कलयुगलं घत्तानन्दं जानीहि ॥ अत्र विरतिभेदाद्गणनियमाच्च पूर्व्वतो भेदस्तेन एकविंश[त्रिंशत्]-मात्राः । (C).

१०३ । अथ घत्तानंदगणनियममाह छक्कलु इति । आइहि—आदौ छक्कलु—षट्कलं गणं, संठबऊ—संस्थापयत, ततश्च तिण्णि चउक्कल—त्रीन् चतुष्कलान् देऊ—ददत, ततश्च पंचक्कल—पंचकलं, चक्कल जुअल—चतुष्कलयुगलं च ददतेति पूर्वेणान्वयः, एवं घत्तानंदं मुणेऊ—जानीध्वं । घत्ताघत्तानंदयोश्च विश्राम-मात्रकृत एव भेद इति अत्रापि लघुत्रयमंते देयमिति बोध्यम् ॥ १०३ ॥ (E).

१०३ । छक्केति ॥ षट्कलमादौ स्थापय त्रीन् चतुष्कलान् देहि । पंचकलं चतुष्कलयुगलं घत्तानंदं जानीत ॥ एवमेकत्रिंशन्मात्राः कार्या इत्यर्थः ॥ २ ॥ (G).

---

१०३ । १ छकल (F). २ चक्कल (D & F), dropt in (E). ३ मुणेऊ (A). ४ १०० (A), १०२ (E), २ (F).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

जहा, जो[१] बंदिअ सिरगंग हणिअ अणंग
अद्धंगहि[२] परिकर धरणु ।
सो जोई[३]जण मित्त हरउ दुरित्त
संकाहरु[४] संकर चरणु[५] ॥ १०४[६] ॥

घत्ताणंद । (A, B & C).

१०४ । उदाहरति । येन वन्दिता शिरसि गङ्गा, हतोऽनङ्गः, अर्द्धाङ्गेन परिवारधारकः । स योगिजनमित्रं हरतु दुरितं शङ्काहर-शङ्करचरणः ॥ परिवारो भार्य्या, चरणं पदं, आदरातिशयद्योतनार्थम् । (C).

१०४ । अथ घत्तानंदमुदाहरति, यो बंदिअ इति । जो — यः, सिरगंग — शिरोगंगया शिरःस्थितया गंगया इत्यर्थः, वंदिअ — वंदितः नमस्कृत इत्यर्थः । अथवा येन शिरसि गंगा वंदितेति । येन अणंग — कामः हणिअ — हतः, यस्य अद्धंगहि — अर्द्धांगे परिकर धरणु — परिकरं कलत्रं धृतवान्, सो — सः, जोई-जण मित्त — योगिजनमित्रं, संकाहरु — शंकाहरः, संकर चरणु — शंकरचरणः, वो [दुरित्त—]दुरितं हरउ — हरतु ॥ १०४ ॥ (E).

१०४ । घत्तानंदो यथा ॥ यो वंदितः शीर्षे गंगया ॥ हतानंगः ॥ अर्द्धांगे परिकरधरः ॥ स योगिजनमित्रं हरतु दुरितं शंकाहरः शंकरचरणः ॥ ३ ॥ (G).

---

१०४ । १ जे (A & B). २ अद्धंगहिँ (A & D). ३ सोइ योइ (B), सो जोइ (C). ४ संकाहर (A & D). ५ चरण (A). ६ १ (A), १०४ (E), ३ (F).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अथ छप्पउ[१] । (F).

छप्पअ छंद छइल्ल[२] सुणहु[३] अक्खरसंजुत्तउ
एआरह तसु[४] बिरइ त पुणु[५] तेरह णिभ्भंतउ[६] ।
वे मत्ता धरि पढम त[७] पुणु[८] चउ चउकल[९] किज्जइ
मज्झट्ठिअ[१०] गण पंच हेठ्ठ बिसबि[११] लहु[१२] दिज्जइ ॥
उल्लाल बिरइ[१३] वे पन्नरह[१४] मत्ता[१५] अट्ठाइस[१६] सोइ[१७]
एम[१८] भणह सुणह[१९] छप्पअ[२०] पअ
अणहा[२१] णच्छि[२२] किंपि[२३] ण होइ ॥ १०५[२४] ॥

१०५। अथ षट्पदिका। षट्पदच्छन्दः छदन्द जानीहि अक्षरैश्च संयुक्तम्, एकादशसु विरतिः, ततः पुनस्त्रयोदशसु निर्व्याह्यतां, द्विमात्रं धृत्वा प्रथमे ततः पुनश्चतस्त्रः कलाः क्रियन्तां, मध्ये-स्थितपञ्चगणाधो द्वावपि लघू दीयेतां ॥ उल्लालयोर्विरतिर्द्वयोः

१०५। १ षट्पदं (D). २ चइल्ल (B), छदन्द (C), घइल्लु (D). ३ सुणह (A, B & C), सणउ (D). ४ तह (A, B & C). ५ पुणवि (B & C), पुणि (F). ६ णिव्वुत्तउ (A), णिरभन्त (B & C), णिभ्भत्त (D). ७ उ (B & C). ८ पुण (B), पुणि (F). ९ चउक्कल (B), चउकला (C). १० मउभ-ट्ठिअ (C), मभ्भझट्ठिअ (E), मउभठिअ (F). ११ विसउ (A), विणुवि (C), बिणवि (F). १२ लेइ (A). १३ वे बिरइ (E), वि चरण वे (F). १४ पन्दरह (C). १५ मत्त (A). १६ अठाइस (A), अट्टाइस (C), अट्टावीस (F). १७ होइ (B & E), सो (F). १८ एव (F). १९ गुणह (D), सुणउ (F). २० छप्पँअह (A), छप्पअ पअह (E). २१ अणह (B), अणहा (E), अणह (C). २२ दुत्थिण (C, D, E & F). २३ किंवि (F). २४ २ (A), ४ (F).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

पञ्चदशसु, मात्रा अष्टाविंशतिर्भवन्ति, एवं गणय जानीहि षट् पदानि। अन्यथाऽत्र न किञ्चिद्भवति॥ छइन्दो — विदग्धः। अक्षरैः सानुप्रासैः। एकादशमात्रास्थाने त्रयोदशमात्रास्थाने च यतिकथनाच्चतुर्विंशतिमात्रः पादो लभ्यते। तत्र मात्रानियममाह। आदौ द्विमात्रगणः, ततश्चतुष्कलामध्यस्थिताः पञ्च गणाः कार्य्याः, ततो द्वावपि लघू देयौ, एवं क्रमेण चतुर्विंशतिमात्राश्चत्वारः पादाः कार्य्याः। पुनश्च पादद्वयं कार्य्यं, तस्य च उल्लालसंज्ञा, ततः प्रत्येकमष्टाविंशतिमात्रा भवन्ति। पञ्चदशसु विश्रामः कार्य्यः। अत्र च पादचतुष्टये षण्णवतिः उल्लालयोश्च षट्पञ्चाशदिति द्विपञ्चाशदधिकशतमात्रा षट्पदी। (C).

१०५। अथ षट्पदनामकवृत्तं लक्षयति। छप्पअ छंद इति। हे छइल्ल — छइल्लाः विदग्धाः, अक्खरसंजुत्तउ — अक्षरसंयुक्तं वक्ष्यमाणप्रकारेण द्व्यशीत्यादिवर्णयुक्तमिति यावत्, छप्पअ छंद — षट्पदं छंदः सुणहु — शृणुत। तत्र यतिनियमपूर्वकं गणनियममाह, एआरहेत्यादिना। तत्र बिरइ — विरतिः, एआरह — एकादशसु मात्रासु भवतीति शेषः, त पुणु — ततः पुनः णिब्भंतउ — निर्भ्रांतं यथा स्यात्तथा तेरह — त्रयोदशसु मात्रासु विरतिर्भवतीति पूर्वेणान्वयः, तथा च चरणे चतुर्विंशतिर्मात्राः भवंतीति भावः, पढम — प्रथमे च चरणे, इदं चोपलक्षणं, द्वितीये तृतीये चतुर्थेऽपि बोध्यं, बे मत्ता धरि — द्वे मात्रे धृत्वा संस्थाप्येत्यर्थः, मज्झह्निट्ठिअ — मध्येस्थिता मध्ये प्रथमस्थमात्राद्वयांतस्थद्विलघ्वोरंतराले स्थिता इत्यर्थः, पंच चउ चउकल — चतुश्चतुःकलास्ततः

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

चतस्रः कला मात्रा येषु तादृशाश्चतुर्मात्रिका इति यावत् गण—गणाः किज्जइ—क्रियंते, त पुणु—ततः पुनः हेट्ठ—अधस्तात्पादांते इति यावत्, विण्णवि लहू—लघुद्वयं दिज्जइ—दीयते, ततः पादचतुष्टयानंतरम्, उल्लाल—उल्लालः वक्ष्यमाणलक्षणं उल्लालनामकं वृत्तं दीयते इति पूर्वेणान्वयः। तत्र च उल्लाले बे विरइ—द्वे विरतौ यतिस्थानद्वयमित्यर्थः, प्रथमं पञ्च [There seems to be a gap here.—Ed.] लघुद्वयं स्थाप्यमेवमेकैकचरणे चतुर्विंशतिर्मात्रा विधाय चरणचतुष्टयं विधेयमनंतरं च उल्लालपादद्वयं देयमिति षट्पदं छंदो भवतीति। इदं च शिष्यबोधायोक्तं, वस्तुतस्तु काव्यपादचतुष्टयोत्तरोल्लालपादद्वयेन षट्पदं छंदो भवतीति। अंते लघुद्वयमेव देयमिति न नियमः काव्यपादेषु तथाऽदर्शनादिति बोध्यम्। (E).

१०५। अथ षट्पदं छंदः॥ छप्पेति॥ षट्पदं छंदो विदग्धाः शृणुत, अक्षरसंयुक्तं, एकादशसु तस्य विरतिस्ततः पुनस्त्रयोदशसु निर्भ्रान्तम्। द्वे मात्रे धृत्वा प्रथमं ततः पुनश्चतुष्कलाः क्रियंते। मध्ये स्थिता गणाः पंच। अधस्ताद्द्वावपि लघू दीयेते॥ उल्लालस्य द्वौ चरणौ॥ द्वि[?]पंचदशमात्रासु [यतिः]। अष्टाविंशौ तौ॥ एवं मनसि जानातु षट्पदे पदानि, अन्यथाच न किमपि भवति॥ अत्र चतुर्विंशतिमात्राकं पादचतुष्टयं॥ तेषु एकादशसु त्रयोदशसु च यतिः कार्या॥ ततोऽष्टाविंशतिमात्राकं पादद्वयं॥ तत्र च सप्तदशसु[?] यतिर्भवतीत्यर्थः॥ चरणद्वये द्वितीया यतिरेकादशसु[?] भवतीति फलति॥ ४॥ (G).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

जहा,

पिंधउ[1] दिढ सस्राह[2] बाह उप्पर पक्खर[3] दइ[4]
बंधु समदि[5] रण धसउ[6] सामि[7] हम्मीर[8] बअण[9] लइ[10] ।
उड्डल[11] णहपह भमउ खग्ग[12] रिउ[13] सीसहि[14] डारउ[15]
पक्खर[16] पक्खर[17] ठेल्लि पेल्लि[18] पब्बअ अ प्फालउ[19] ॥
हम्मीर[20] कज्जु[21] जज्जल[22] भणइ[23]
कोहाणल मुह मह[24] जलउ ।
सुल[25]ताण सीस करबाल[26] दइ[27]
तेज्जि[28] कलेबर दिअ[29] चलउ ॥ १०६[30] ॥

१०६ । उदाहरति ॥ पिनद्धदृढ़सन्नाहो वाहस्योपरि पक्खरं दत्त्वा बन्धून् संवाद्य रणे पतामि स्वामिहम्वीरवचनं नीत्वा । उड्ड-

१०६ । १ पिंधउँ (A), पिंधिष (E). २ सभाह (D). ३ पक्ख (E). ४ देइ (A & E). ५ समरि (A), संभरि (F). ६ धसिष (E). ७ स्वसाहि (D), साहि (E). ८ हम्बीर (B & C), हम्मीव (F). ९ विणष (B). १० णइ (C), लई (D), लेइ (E). ११ उच्छल (B & C), उड्डुउ (D & E), उडल (F). १२ खक्ख (F). १३ घरि (A & E), रिपु (F). १४ सिघहि (E), सीस (F). १५ माडउँ (A), भालउ (B & C), भाषउ (D), भालउ (F). १६ पक्खरे (A & B), पक्ख (E). १७ पक्खरे (B). १८ वेल्लि (F). १९ प्फारउँ (A), पप्फारउ (B), षपकालउ (C), षप्फारउ (F). २० हम्बीर (B & C), हंमी (E). २१ कज्ज (D, E & F). २२ तज्जल (D), उउज्जलु (B & C), उज्जल (E). २३ भणु (B & C), भष (D, E & F). २४ मुह (A), मइँ मइँ (D), मह मह (E), मह (F). २५ सुरि (A), सुलि (D & E), सुर (F). २६ कवाल (A). २७ देइ (A, D & E), दहि (C). २८ तज्जि (A). २९ दिव (B, C & F). ३० २ (A), ५(F).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

थामि नभःपथं, भ्रामयामि खड्गं, रिपुशिरसि ज्वालयामि पक्खरं, ठेलयित्वा पेलयित्वा पर्व्वतमुत्पाटयामि॥ हम्मीरकार्य्ये उज्ज्वलनो भणति, क्रोधानलमुखमध्ये ज्वलति, सुरतानशीर्षे करवालं दत्त्वा त्यक्त्वा कलेवरं दिवं चलामि॥ हम्मीरसेनापतेरुज्ज्वलनस्येयमुक्तिः। वाहो—घोटकः, पक्खरशब्दोऽश्वकवचवाची, नीला—प्राप्य, कलेवरं त्याजयित्वा दिवं चालयामीत्यर्थः। (C).

१०६। अथ षट्पदमुदाहरति पिंधिअ दिढ इति। दिढ सखाह—दृढसंनाहं पिंधिअ—पिधाय, वाह उप्पर—वाहोपरि पक्खर देइ—वाणवारणं दत्त्वा, बंधु समदि—बन्धून्संभाव्य, साहि हम्मीर बअण लेइ—शाह-हमी[र]वचनं गृहीत्वा, रण धसिअ—रणे प्रविश्य, पक्ख[र] पक्खर—वाणवारणेन वाणवारणं, स्वकवचेन प्रतिपक्षाणां कवचमित्यर्थः, ठेल्लि—चोटयित्वा, पेल्लि—नोदयित्वा, उड्डउ—उड्डीयमानः सन्, णहपह—नभःपथे भमउ—भ्रमामि, अरि सिसहि—अरिशिरसि, खग्ग—खड्गं डारउ—पातयामि, पब्बह अ फालउ—पर्वतानहं स्फालयामि (क्रोधानलमध्ये जलउ—ज्वलामि, हम्मीरकज्ज यामि) [?] उल्लंघयामीति यावत्। किं च सुरताणसीस करवाल देइ—खड्गेन तस्य शिरश्छित्त्वेति यावत्, मह—अहं, कोहाणल मह—क्रोधानलमध्ये जलउ—ज्वलामि, हम्मीरकज्जं—[ह]मीरका[र्य]र्थाय, कलेवर तेज्जि—कलेवरं शरीरं त्यक्त्वा, दिअ चलउ—दिवं गच्छामि इति जज्जलः * * * हमीर * *। (E). [Something seems to be wanting here.— Ed.]

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

पत्र[१] पत्र[१] तलउ[२] णिबद्ध[३] मत्त चउ[४]बीसह[५] किज्जइ[६]
अक्खर[७] डंबर[८] सरिस छंद[९] इअ सुद्ध गणिज्जइ[१०] ।
आइहि[११] छक्कलु[१२] होइ चारि चउकलउ[१३] णिरुत्तउ[१४]
दुक्कल अंत णिबद्ध[१५] सेस कइ[१६]बत्थु[१७] णिबुत्तउ[१८] ॥
बाबस्स[१९] सउ बि मत्तह[२०] मुणहु[२१]
उल्लालउ[२२] सहिअउ[२३] गुणह[२४] ।
छप्पअ छंद[२५] एरिसि[२६] बि होइ
काइँ[२७] गंथि गंथि[२८] बिमरह[२९] ॥ १०७[३०] ॥

---

१०६ । यथा ॥ पिंधेति ॥ पिधाय दृढसन्नाहं वाहोपरि कवचं दत्त्वा, बन्धून्संभाष्य रणे प्रविशामि, स्वामिहम्मीरवचनं लब्ध्वा ॥ उड्डीय नभःपथे भ्रमामि, खड्गेन रिपुशिरांसि पातयामि ॥

---

१०७ । १ बप (D). २ तलइ (A & E). ३ णिंड (A), णिबद्धं (D), णिबद्धा (F). ४ चउस (C), चौबीसहि (E), चोबीसह (F). ५ किसह (A). ६ किज्जई (D). ७ अक्खरं (A). ८ डमर (B & C). ९ छन्दसइ (C). १० भणिज्जइ (D, E & F). ११ आइइ (C). १२ लक्कलु (D). १३ चउकलअ (C), चउकलउं (D). १४ णिवुत्तउ (A & E). १५ णिवुत्त (A), ठवेऊ (D & F). १६ कहि (B), कई (D), कवि (F). १७ वत्थु (A), वखु (B). १८ णिरुत्तउ (D & E), णिउत्तउ (F). १९ वामसु (A), वावण (B & C). २० मत्तऊ (E). २१ सुणऊ (A), मुणहु (C), मुणह (D). २२ उल्लालहि (E), उल्लालऊ (F). २३ सरिसउ (A, B, C & D), सहिअ (E). २४ गुणऊ (A & B). २५ छन्दअ (B). २६ एरिप (B), एम (C), एरिसिअ (D), एरिस (F). २७ काँहि (B & C). २८ गंथ गंथि (A & E). २९ अमरऊ (A), विरमइ (B), विमरऊ (C), विमरसह (F). ३० ४ (A), ६ (F).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

कवचं कवचं चोटयित्वा नोदयित्वा पर्वतानप्यास्फारयामि॥ हम्मीर-कार्याय जल[ज्ज]लो भणति कोपानलमध्ये ज्वलामि, सुरत्राण-शीर्षे करवालं दत्त्वा त्यक्त्वा कलेवरं दिवं चलामि॥ हम्मीरसेव-कस्य जज्जलनाम्न इयमुक्तिः॥ ५॥ (G).

१०७। षट्पदच्छन्दस एव प्रकारांतरमाह। पादपादतले निबद्धा मात्राः च[तु]र्विंशतिः, कथ्यन्ताम् अक्षराणि डम्बराणि, सदृशं छंद इदं शुद्धं गम्यताम्, आदौ षट्कला भवन्ति चत्वार-श्चतुष्कलाः निरुक्ताः, द्विकलोऽन्ते निबद्धः, शेषकविना वस्तु निरुक्तं। द्विपञ्चाशत् शतमपि मात्रा जानीहि, उल्लालेन समं गुण[य] षट्-पदच्छन्द ईदृशमपि, किं ग्रन्थं ग्रन्थं विम्रृषत॥ तलशब्दः स्वरूपार्थः, डम्बराणि दृढबन्धयोग्यानि, सदृशमिति प्रतिपादं दृढबन्धः कार्य्य इत्यर्थः, शुद्धं सर्व्वावयवसुश्रवं ज्ञायताम्। पूर्व्वमादौ द्विकलः ततश्चतुष्कलाः पञ्चेत्युक्तमिदानीन्तु प्रथमतः षट्कलः ततश्चत्वार-श्चतुष्कला इति विशेषः। (C).

१०७। अथ षट्पदमेव प्रकारांतरेण लक्षयति। पअ पअ तलह इति। यत्र आइहि छक्कलु होइ—आदौ षट्कलो भवति, ततः चारि चउकल[उ]—चत्वारश्चतुःकलाः णिबुत्तउ—निरुक्ताः, अंत—पादांते, दुक्कलु—द्विकलः निबद्धः, एवं यत्र पअ पअ तलह णिबद्ध—पदपदतले प्रतिचरणतलमित्यर्थः निबद्धाः मत्त चउबीसहि—मात्राश्चतुर्विंशतिः किज्जइ—क्रियंते, तत उल्लालहि सहिअ—उल्लालेन सहितम् अंते उल्लालपादद्वययुक्तमित्यर्थः, सेस कइ बत्थु णिरुत्तउ—शेषकविना वस्तु निरुक्तम्। एतदेव वस्तु इति

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

जहा,

जहा सरश्र ससि बिंब जहा हर[1] हार[2] हंस ठिश्र[3]
जहा फुल्ल सिश्र कमल जहा सिरि[4] खंड खंड किश्र[5] ।
जहा गंग कल्लोल जहा रोसाणिश्र[6] रुप्पइ[7]
जहा दुद्धवर[8] सुद्ध[9] फेण[10] फंफाइ[11] तलप्पइ[12] ॥
पिश्र पाश्र[13] पसाए[14] दिट्ठि[15] पुणि[16]
णिहुश्र[17] हसइ जह[18] तरुणिजण[19] ।
बरमंति चंडेसर[20] कित्ति तुश्र
तत्थ[21] देक्ख[22] हरिबंभ[23] भण[24] ॥ १०८[25] ॥ [छप्पउ]

नामांतरेणोक्तमित्यर्थः । इति गुणह — गुणयत जानीतेत्यर्थः । इश्र छंद — इदं छंदः, श्रक्खर डंबर सरिस — अक्षराडंबरसदृशं सुश्राव्यवर्णसमुल्लसितगौडीरीतिमदित्यर्थः, चेद्भवतीति शेषः, तदा छ[सु]द्ध भणिज्जइ — शुद्धं भण्यते । अत्र च बावस सउ बि मत्तह

१०८ । १ हइ (E). २ हास (C). ३ च्छिश्र (C). ४ सिर (A). ५ दिश्र (A, B & C). ६ रोसाणि (C). ७ रूप्पइ (B). ८ दुद्ध वरि (F). ९ सुद्ध (B & C). १० फेण (A). ११ फंफाए (A), फम्फाइ (B & C), फंकाइ (D), संकाइ (F). १२ लतप्पइ (A), तलप्पुइ (D), लफुप्पइ (F). १३ पाँश्र (A), पाए (D). १४ पसाइ (C), पसाश्र (D), पहारे (F). १५ दिट्ठि (A, E & F). १६ पल्ल (A), पक्ष (B), पन्द (C), पण (E). १७ विहंसि (D). १८ जइ (B), जहा (C). १९ तरुणिगण (A), तरुणीजण (B). २० चंडेसरवर (B), चंडसर (F). (Here डे should be read as short, vide श्लोक ५, p. 7). २१ तच्छ (A). २२ पेक्खि (A), देकु (D), देक्खि (E). २३ हरियम्मु (B), हरिहरवम्म (C), हरिवंम्ह (F). २४ भण (B). २५ ५ (A), ७ (F).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

—द्विपंचाशत्शतमपि मात्राः काव्यपादचतुष्टयस्य षण्णवतिरुल्लाल-पादद्वयस्य च षट्पंचाशदेवमुभयोर्मिलित्वा द्विपंचाशदधिकं शतं मात्रा इत्यर्थः, मुणह—जानीत, छप्पअ छंद—षट्पदच्छंदः, एरिसि वि होइ—एतादृशमपि भवति, काइ गंथ गंथि—किमर्थं ग्रंथग्रंथिं विमरह—विमृशत। इदं च पूर्वोक्तलक्षणेनैव गतार्थत्वात् क्षेपकमिवाभातीति बोध्यम्। (E).

१०७। अस्य लक्षणस्य निष्कर्षमाह॥ पअ पेति॥ पदपद-तल-निबद्धा मात्राश्चतुर्विंशतिः क्रियंते, अक्खराडंबरसदृशं छंद-इदं शुद्धं भण्यते॥ आदौ षट्कलो भवति चत्वारश्चतुष्कला-निरुक्ताः॥ द्विकलमंते स्थापय शेषकविना वस्तु निरुक्तम्॥ द्विपंचाशत् शतमपि मात्रा जानीत, उल्लालेन सहितं गुणय॥ षट्पदं छंद एतादृशं भवति, किमर्थं ग्रंथग्रंथिं विमृशत॥ श्लोक-पादचतुष्टय उल्लालपादद्वययोगे द्विपंचाशदधिकं शतं मात्रा भवंति। तत्र च लघुगुरुनियमो नास्ति। वस्त्विति नामांतरेणेत्यर्थः॥ (G).

१०८। उदाहरति। यथा शरच्छशिविम्बं यथा हरहासहंस-स्थितिः यथा फुल्लसितकमलं यथा श्रीखण्डखण्डं दीयते, यथा [गंगा]कल्लोलः, यथा रोषाणितं रूप्यं, यथा दुग्धवरमुग्धफेनः कम्पायितः आप्लवते, प्रियपादप्रसादे पृष्ठे निश्चतहसितं यथा तरुणी-जनस्य, वरमन्त्रिचण्डेश्वर कीर्त्तिस्तव तथा दृश्यते हरिहरब्रह्मा वदति॥ रोषणशब्दः सुवर्णरजतमार्जनशिला[बोधकः], तेन कृत-मार्जनरजतवदित्यर्थः॥ हरिहरब्रह्मा कविः, ब्रह्मेति वन्दिविशेष-उच्यते॥ (C).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

१०८। अथैतदुदाहरति जहा सरअ ससि बिंबेति। यथा शरत्-शशिविंबं, यथा हरहारहंसस्थितिः, हरः—कर्पूरगौरः, हारो—मौक्तिकदाम, हंसाः—पक्षिविशेषास्तेषां स्थि[ति]रित्यर्थः, जहा फुल्ल सिअ कमल—यथा फुल्लसितकमलं पुण्डरीकमिति यावत्, जहा खण्ड किअ—खंडीकृतः, सिरि खंड—श्रीखंडश्चंदनमित्यर्थः, जहा गंग कल्लोल—यथा गंगाकल्लोला महोर्मय इत्यर्थः, जहा रोसाणिअ रुप्पइ—यथोज्ज्वलितं रूप्यं, जहा दुद्ध बर सुद्ध फेण फंफाइ तलप्पइ—यथा दुग्धवरस्य सुग्धफेनः फंफाइ—उद्गम्य तलप्पइ—तपति, यद्यपि अत्र दुग्धसाम्यं कीर्त्तेः कविसंप्रदायविरुद्धं शीतत्वेनैव कीर्त्तिवर्णनस्योचितत्वात् तथापि श्वैत्यमात्रे तात्पर्य्यं न तदंशेऽपीति भावः, तप्तीभूय भांडादुद्गतः दुग्धफेनस्यातिश्वेतो भवतीति तथोक्तिः। पुणः[नः] यथा पिअ पाअ पसाए दिट्ठि—प्रियप्राप्तप्रसाददृष्टिः प्रियस्य प्राप्ता प्रसाददृष्टिर्येन स तादृश इत्यर्थः, तरुणिजण—तरुणिजनः णिहुअ हसइ—निभृतं हसति, तत्थ—तथा तव कित्ति—कीर्त्तिं देक्खि—प्रेक्ष्य, वरमत्ति—वरमते चण्डेश्वर महाराज, हरिर्ब्रह्मा भणति। ब्रह्मेति वंदिनामुपनाम जातिविशेषो वा, तथाच ब्रह्मजातीयस्तदुपनामको वा हरिनामा भवतीत्यर्थः। (E).

१०८। यथा जहेति॥ यथा शारदशशिविंबो, यथा हरहारहंसस्थितिः, यथा फुल्लसितकमलं, यथा श्रीखंडं चूर्णितं। यथा गंगाकल्लोलो, यथोज्ज्वलितं रौप्यं, यथा दुग्धोपरिशुद्धफेनः फंफायितः स्फुरति, प्रिये पादप्रहारे दृष्टे निभृतं हसति यथा तरुणि-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

Here follows a *śloka* १०८ (क) in MSS. (A, B and E), not found in MSS. (C, D and F), nor in the gloss (G).

चारि पात्र[१] भण कब्बके[२] बे बि पात्र उल्लाल[३]।
इम बिहु लक्ष[क्ख]ण एक्क कइ[४] पढ़ छप्पत्र पत्थार[५]॥
१०८ (क)॥ [दोहा]

अह कब्ब लक्खण[१]। (B).

आइ अंत दुहु[२] छक्कलउ तिण्णि तुरंगम मज्झ[३]।
तीए[४] जगणु[५] कि विप्पगणु[६] कब्बह[७] लक्खण बुज्झ॥
१०९[८]॥ दोहा।

जनः॥ वरमंत्रिन् चंडेश्वरस्य कीर्त्तिस्तव तथापेच्य हरि-ब्रह्मणो[ह्मा] भणति॥ हरिकवेश्चंडेश्वरमंत्रिणं प्रत्युक्तिः॥ ७॥ (G).

१०८ (क)। अथ पूर्वोक्तमेव दोहावृत्तेनोपसंहरति चारि पाअ इति। चारि पाअ—चत्वारः पादाः, कब्बके भण—काव्यस्य भण, बे बि पाअ उल्लाल—द्वावपि पादा उल्लालस्य भणेति पूर्वेणान्वयः,

---

१०८ (क)। १ पञ्चह (B). २ इम कव्वकइ (A), इम कव्व भण (B). ३ 2nd and 4th quadrants transposed in A, and पा for पाम in the same MS. ४ विङ्क लक्षण पढम एक्क कइ (A), दुङ्क लक्खण पढ एक्क करि इम (B). ५ छप्पम पअ पत्थार (A).

१०९। १ अथ काव्यलक्षणं (A), अह कव्व लक्खण (C), अथ काव्यं (F). २ दुइ (F). ३ मज्ज (F). ४ ताए (D), तीय (F). ५ जगण (A). ६ विप्पगण (A). ७ कव्वहि (A), कव्वह्ङ (C). ८ ७ (A).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

इम — एवं, बिङ्क लक्खण — द्वे लक्षणे एक्क कइ — एकं क्लत्वा पढ, एष छप्पअ पत्थार -- षट्पदप्रस्तारः ॥ (E).

१०९। अत्र च काव्यनामच्छन्दः पादचतुष्टयेन भवति, उल्लाल-पदद्वयोसाहित्येन च तत्र षट्पदीत्वमिति दर्शयितुमादौ काव्य-च्छन्दो दर्शयति। आदावन्ते द्वौ षट्कलौ, त्रयस्तुरङ्गमा मध्ये। तृतीये जगणः किं विप्रगणः, काव्यलक्षणं बुध्यस्व ॥ तुरङ्गमश्चतुष्कलः, किमिति विकल्पेन, सर्व्वलघुचतुष्कलो विप्रगणः ॥ (C).

१०९। अथ षट्पदोपयोगिकाव्यलक्षणमाह आइ अंत इति। यत्र आदौ अंते, दुअ छक्कलउ — द्वौ षट्कलौ भवतः इति शेषः, एक आदौ एकः अंते इत्यर्थः, मज्झ — मध्ये आद्यंतस्थयोः षट्कलयोरंतराले इत्यर्थः, तिणि तुरंगम — त्रयस्तुरंगमास्त्र[य]-श्चतुःकलाः भवंतीति शेषः, तत्र तीए — तृतीये स्थाने द्वितीय-चतुःकल इत्यर्थः जगणो मध्यगुरुर्गणः किंवा विप्रगणश्चतुर्लघुको-गणः कर्तव्यः, तत् कव्वह लक्खण — काव्यस्य लक्षणं, बुज्झ — बुध्यतां ॥ अयमर्थः, प्रथमं षट्कलस्ततस्त्रयश्चतुष्कलास्ततश्च षट्कलः एवं प्रतिपादं पंच गणाः कर्त्तव्यास्तेष्वेव च प्रथमषट्कला *** त्रये तृतीयो गणो जगणो विप्रो वा विधेयः, एवं च तृतीये विप्रश्चेद्दी-यते तदा सर्वलघ्वात्मकोऽपि काव्यभेदो भवति, यदि च जगणो-दीयते तदा तु न तृतीयस्थजगणांतर्गतस्य एकैकगुरोः प्रति-चरणमावश्यकत्वात्सर्वगुर्वात्मकस्तु न भवति च, जगणपक्षे तृतीयस्थ-गणाद्यंतस्थस्य लघुद्वयस्य प्रतिचरणमावश्यकत्वादिति, विप्रपक्षे च चतुर्लघूनां प्रतिचरणमावश्यकत्वादिति सुधीभिर्विभावनीयम् । (E).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

चउ अग्गल[1] चालीस गुरु एक्कक्के गुरु[2] लेहु[3]।
जो गुरुहीणउ सक्क सो[4] णाम ग्गहण कुणेहु[5] ॥ ११०[6] ॥
दोहा।

१०९। अथ काव्यमात्रलक्षणमाह ॥ आईति ॥ आदावंते द्वयं षट्कलयोस्त्रयस्तुरंगमा मध्ये। तृतीयो जगणः किंवा विप्रगणः काव्यस्य लक्षणं बुध्यस्व ॥ ८ ॥ (G).

११०। अथ काव्यच्छन्दसो भेदान् दर्शयितुमुपक्रमते। चतुरग्रचत्वारिंशद्गुरव एकैकस्मिन् गुरुं लघुं नय, यो गुरुहीनः शक्रस्तनामग्रहणं कुरु ॥ चतुरग्रेति चतुरधिकेत्यर्थः। चतुरधिका चत्वारिंशद्गुरवोऽत्र सम्भवन्ति एकादशगुरु-लघुद्वय-युक्तैकैकपादयोगात्। अत्र च एकैकगुरुस्थाने लघुद्वयकरणे यो गुरुहीनः स शक्रनामेत्यर्थः। (C).

११०। अथ वक्ष्यमाणेषु काव्यभेदेषु शक्रनामकं भेदं लक्षयन् भेदान[यन]प्रकारमाह चउ अग्गलेति। चउ अग्गल चालीस गुरु — चतुरधिकचत्वारिंशद्गुरु काव्यपादचतुष्टयं चतुश्चत्वारिंशद्गुरु इति यावत्, एक्कक्के गुरु लेहु — एकैकं गुरु गृहाण न्यूनं कुरु, एवं कृते च जो गुरुहीणउ — यो गुरुहीनः एकैकगुरुह्रासेन द्विलघुवृद्ध्या क्रियमाणेषु भेदेषु यः सर्वलघुरित्यर्थः भवतीति शेषः, सो स[क्क — श] शक्रः। तत्र च एकैकगुरुवृद्ध्या लघुद्वयह्रासेनेति

११०। १ चउग्गल (B), चउलग्ग (C), चतुग्गल (F). २ लङ्घगुरु (C). ३ देह (D & F). ४ सउ (A), सोइ (B, C & D). ५ करेऊ (A). ६ ८ (A), ९ (F).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

जहा,

जसु कर फणिवइ बलअ तरुणिवर तणुमह बिलसइ[१]
णअण अणल[२] गल गरल बिमल ससहर[३] सिर णिवसइ।
सुरसरि सिरमह रहइ[४] सअलजण[५] दुरित दमण[६] कर[७],
हसि ससिहर[८] हरउ दुरित[९]
बितरह अतुल[१०] अभअबर[११] ॥ १११[१२] ॥

सक्क[१३] । (B & C).

शेषः, णाम ग्गहण कुणेऊ — नामग्रहणं शंभ्वादिशब्दं...तमिति भावः कुरुष्व । अयं भावः — तृतीये जगणदानपक्षे प्रथमषट्कलस्य गुरुत्रयं, द्वितीयचतुष्कलस्य गुरुद्वयं, तृतीयचतुष्कलस्य जगणस्वरूपत्वात्तस्यैको गुरुः, चतुर्थचतुष्कलस्य गुरुद्वयं, पंचमस्य षट्कलस्य गुरुत्रयमेकादश गुरवः, जगणाद्यंतःस्थलघुद्वयं च प्रतिचरणं काव्ये आवश्यकं, चरण-चतुष्टये च मिलित्वा चतुश्चत्वारिंशद्गुरवोऽष्टौ लघव आवश्यकाः, अतएव काव्ये सर्व्वेऽपि चरणा गुरुरूपा एवेति न संभवति जगण-पक्षे अष्टलघूनां विप्रपक्षे षोड़शलघूनामावश्यकत्वात्, तेषु च [चतुः]-चत्वारिंशद्गुरुषु क्रमेण एकैकगुरुह्रासेन लघुद्वयवृद्ध्या भेदेषु क्रिय-

१११। णिवसइ (B). १ बल (A). २ सिजसु (D), ससि जसु (E), ससि (F). ४ वहइ (A, B & C). ५ सअलण (A), मअसअल (B), सअसअन (C). ६ दलण (B, C & D). ७ कर (B). ८ हसि हर (A), हसिअ ससिहर (B & C). ९ हर हरउ दुरित (A), हर दुरित (B), हरउ दुरित (D), तुअ दुरित हरउ (E). १० तुह दिसउ (A), तुअ वितरहउ (B), ...उ (C), वितरइ सो (E), वितर हर (F). ११ अभअबर (B). १२ ९ (A), १० (F). १३ शक्र। (A).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

माणेषु यः सर्वलघुर्भवति सः शक्रः, षसवतिलघ्वात्मके शक्रे च क्रमेण एकैकगुरुवृद्ध्या लघुद्वयह्रासेन यावच्चतुस्त्वारिंशद्गुरवोऽष्टौ च लघवो भवंति, तावंति नामानि भवंति। तांश्च भेदाननुपदमेव विवेचयिष्यामः। अत्र च प्रथमं गुरूनादायैकगुरुह्रासलघुद्वयवृद्धिक्रमेण शक्रनिरुक्तिस्ततश्च लघूनादाय लघुद्वयह्रासैकगुरुवर्द्धनक्रमेणान्येषां निरुक्तिरुभयथापि भेदानयनं संभवतीति प्रदर्शनायेति ध्येयम्। (E).

११०। काव्यभेदानाह॥ चउ इति॥ चतुरधिकाश्चत्वारिंशद्गुरवएकैको गुरुर्ह्रसति। यो गुरुहीनः शक्रः स नामग्रहणं कुरुत॥ अयमर्थः—प्रतिचरणं जगणस्यावस्थितौ अष्टौ लघवश्चतुश्चत्वारिंशद्गुरवइति फलति॥ तत्र गुरुहीनो भेदः शक्रसंज्ञो भवतीति॥९॥ (G).

१११। तत्र सर्व्वलघुकमुदाहरति। यस्य करे फणिपतिवलयं, तरुणिवरा तनुमध्ये विलसति, नयनेऽनलो गले गरलं, विमलशशधरः शिरसि निवसति, सुरसरित् शिरोमध्ये वहति, स सकलजनदुरितहरः[दलनः] हसित्वा शशिधरो दुरितं हरतु तव वितरतु अभ[य]वरौ॥ (C).

१११। अथ शक्रमुदाहरति जसु करेति। जसु कर—यस्य करे, फणिवइ वलअ—फणिपतिवलयं, तणुमह—तनुमध्ये तरुणिवर—तरुणिवरा युवतीश्रेष्ठा पार्वती विलसइ—विलसति, यस्य णअण—नयने भालस्थतृतीयनेत्रे अणल—अनलः, गल गरल—गले कंठे गरलं विषं, बिमल ससि जसु सिर—विमलः एककलात्मकतया कलंकशून्यः शशी [यस्य शिरसि] णिवसइ—निवसति,

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

जह जह बलआ बढ्ढि[1] हइ तह तह णाम कुणेहु[2] ।
संभुहि[3] सउ[4] भण[5] भिंग[6]गण चउआलीस[7] मुणेहु[8] ॥
११२[9] ॥ दोहा ।

इदं च क्रियापदं नयने-इत्यादिप्रत्येकान्वयि । यस्य सिरमह — शिरोमध्ये, सुरसरि [सुरसरित्] रहइ — तिष्ठति, यस्य सअल जण दुरित दमण कर — सकलजनदुरितदमनकरः, सो — सः, ससि-हर — शशिधरो महादेवः, हसि — हसिला, तुअ दुरिअ — तव दुरितं हरउ — हरतु, बितरउ अभअबर — वितरतु अभयवरम् ॥ अत्र चरणस्थाः चतुर्विंशतिरपि मात्रा लघुरूपाः स्पष्टाः । अत्र सो इत्योकारो लघुर्बोध्यः । (E).

१११ । यथा जसु करेति ॥ यस्य करे फणिपतेर्वलयं ॥ तरुणी-वरा तनुमध्ये विलसति ॥ नयनेऽनलो गले गरलं, विमलः शशी यस्य शीर्षे निवसति ॥ सुरसरिच्छीर्षमध्ये तिष्ठति ॥ सकलजन-दुरितदमनकर हसिला शशिधर हर दुरितं वितर हर अतुल-मभयवरम् ॥ १० ॥ (G).

११२ । अत्र लघुद्वयहान्या एकैकगुरुवृद्धितो नामानि वक्तु-मुपक्रमते । यथा यथा वलयो वर्द्धते तथा तथा नाम कुरु । शक्रमारभ्य नीला भृङ्गगणं पंचचत्वारिंशज्जानीहि ॥ वलयो गुरु-

---

११२ । १ वड्ढइ (B), बड्ढइ (C). २ कुणेह (A & C). ३ चक्क (A), सक्क (B & C). ४ संठ (B). ५ भणि (E). ६ भृङ्ग (B).
७ पचतालीस (A), पाचतालीस (B), पाँचतालीस (C), चौआलीस (E & F).
८ मुणेह (A), कुणेऊ (B & C). ९ १० (A), ११ (F).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

	Rs.	
Nyayabindutīkā, (Text)	0	10
Nyāya Kusumāñjali Prakarana (Text) Vol. I, Fasc. 1–6; Vol. II, Fasc. 1–3 @ /6/ each	3	6
Padumawati Fasc. 1–3 @ 2/	6	0
Pariçista Parvan, (Text) Fasc. 1–5 @ /6/ each	1	14
Prākrita-Paingalam, Fasc. 1–2 @ /6/ each	0	12
Prithivirāj Rāsa, (Text) Part II, Fasc. 1–5 @ /6/ each	1	14
Ditto (English) Part II, Fasc. 1	0	12
Prākrta Laksanam, (Text) Fasc. 1	1	8
Parāçara Smrti, (Text) Vol. I, Fasc. 1–8; Vol. II, Fasc. 1–6; Vol. III, Fasc. 1–6 @ /6/ each	7	8
Parāçara, Institutes of (English)	0	12
Prabandhacintāmani (English) Fasc. 1–3 @ /12/ each	2	4
*Sāma Vēda Samhitā, (Text) Vols. I, Fasc. 5–10; II, 1–6; III, 1–7; IV, 1–6; V, 1–8, @ /6/ each Fasc.	12	6
Sāṇkhya Sūtra Vṛtti, (Text) Fasc. 1–4 @ /6/ each	1	8
Ditto (English) Fasc. 1–3 @ /12/ each	2	4
Suçruta Samhitā, (Eng.) Fasc. 1 @ /12/	0	12
*Taittereya Samhitā, (Text) Fasc. 14–45 @ /6/ each	12	0
Tāṇdya Brāhmana, (Text) Fasc. 1–19 @ /6/ each	7	2
Tattva Cintāmani, (Text) Vol. I, Fasc. 1–9, Vol. II, Fasc. 1–10, Vol. III, Fasc. 1–2, Vol. IV, Fasc. 1, Vol. V, Fasc. 1–5, Part IV, Vol. II, Fasc. 1–10 @ /6/ each	13	14
Trikānda-Mandanam, (Text) Fasc. 1–2 @ /6/	0	12
Tul'si Sat'sai, (Text) Fasc. 1–5 @ /6/ each	1	14
Upamita-bhava-prapañca-kathā (Text) Fasc. 1–2 @ /6/ each ...	0	12
Uvāsagadasāo, (Text and English) Fasc. 1–6 @ /12/	4	8
Varāha Purāna, (Text) Fasc. 1–14 @ /6/ each	5	4
*Vāyu Purāna, (Text) Vol. I, Fasc. 2–6; Vol. II, Fasc. 1–7, @ /6/ each	4	
Visnu Smrti, (Text) Fasc. 1–2 @ /6/ each	0	12
Vivādaratnākara, (Text) Fasc. 1–7 @ /6/ each	2	10
Vṛhannāradiya Purāna, (Text) Fasc. 1–6 @ /6/	2	4
Vṛhat Svayambhū Purāna, Fasc. 1–6	2	4
Tibetan Series.		
Pag-Sam Thi S'iñ, Fasc. 1–4 @ 1/ each	4	0
Sher-Phyin, Vol. I, Fasc. 1–5; Vol. II, Fasc. 1–3; Vol. III, Fasc. 1–5, @ 1/ each	13	0
Rtogs *brjod dpag hkhri* S'iñ (Tib. & Sans.) Vol. I, Fasc. 1–5; Vol. II. Fasc. 1–5 @ 1/ each	10	0
Arabic and Persian Series.		
'Ālamgīrnāmah, with Index, (Text) Fasc. 1–13 @ /6/ each... ...	4	14
Al-Muqaddasi (English) Vol. I, Fasc. 1–2 @ /12/	1	8
Āīn-i-Akbarī, (Text) Fasc. 1–22 @ 1/ each	22	0
Ditto (English) Vol. I, Fasc. 1–7, Vol. II, Fasc. 1–5, Vol. III, Fasc. 1–5, @ 1/12/ each	29	12
Akbarnāmah, with Index, (Text) Fasc. 1–37 @ 1/ each	37	0
Ditto English Fasc, 1–5 @ 1/ each	5	0
Arabic Bibliography, by Dr. A. Sprenger	0	6
Bādshāhnāmah, with Index, (Text) Fasc. 1–19 @ /6/ each	7	2
Catalogue of Arabic Books and Manuscripts	1	0
Catalogue of the Persian Books and Manuscripts in the Library of the Asiatic Society of Bengal. Fasc. 1–3 @ 1/ each	3	0
Dictionary of Arabic Technical Terms, and Appendix, Fasc. 1–21 @ 1/ each	21	0
Farhang-i-Rashīdī, (Text) Fasc. 1–14 @ 1/ each	14	0
Fihrist-i-Ṭūsī, or, Ṭūsy's list of Shy'ah Books, (Text) Fasc. 1–4 @ /12/ each	3	0
Futūh-ush-Shām of Wāqidī, (Text) Fasc. 1–9 @ /6/ each	3	6
Ditto of Āzādī, (Text) Fasc. 1–4 @ /6/ each	1	8
Haft Āsmān, History of the Persian Masnawi, (Text) Fasc. 1 ...	0	12
History of the Caliphs, (English) Fasc. 1–6 @ /12/ each	4	8
Iqbālnāmah-i-Jahāngīrī, (Text) Fasc. 1–3 @ /6/ each	1	2
Iṣābah, with Supplement, (Text) 51 Fasc. @ /12/ each	38	4
Maāṣir-ul-Umarā, Vol. I, Fasc. 1–9, Vol. II, Fasc. 1–9; Vol. III, 1-10; Index to Vol. I, Fasc. 10-11; Index to Vol. III, Fasc. 11-12; Index to Vol. II, Fasc. 10–12 @ /6/ each	13	2

* The other Fasciculi of these works are out of stock, and complete copies cannot be supplied.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

	Rs.	
Maghāzi of Wāqidī, (Text) Fasc. 1–5 @ /6/ each ...	1	14
Muntakhabu-t-Tawārīkh, (Text) Fasc. 1–15 @ /6/ each	5	10
Muntakhabu-t-Tawārīkh, (English) Vol. I, Fasc. 1–7; and 2 Indexes Vol. II, Fasc. 1–5 and Index; Vol. III, Fasc. 1 @ /12/ each ...	12	0
Muntakhabu-l-Lubāb, (Text) Fasc. 1–19 @ /6/ each	7	2
Ma'āsir-i-'Ālamgīrī, (Text), Fasc. 1–6 @ /6/ each	2	4
Nukhbatu-l-Fikr, (Text) Fasc. 1	0	6
Nizāmī's Khiradnāmah-i-Iskandari, (Text) Fasc. 1-2 @ /12/ each	1	8
Riyāzu-s-Salātīn, (Text) Fasc. 1–5 @ /6/ each	1	14
*Suyūṭy's Itqān, on the Exegetic Sciences of the Koran, with Supplement, (Text) Fasc. 7–10 @ 1/ each	4	0
Ṭabaqāt-i-Nāṣirī, (Text) Fasc. 1–5 @ /6/ each	1	14
Ditto (English) Fasc. 1–14 @ /12/ each	10	8
Ditto Index	1	0
Tārīkh-i-Fīrūz Shāhi of Ziyāu-d-dīn Barni (Text) Fasc. 1–7 @ /6/ each...	2	10
Tārīkh-i-Fīrūzshāhi, of Shams-i-Sirāj Aif, (Text) Fasc. 1–6 @ /6/ each...	2	4
Ten Ancient Arabic Poems, Fasc. 1-2 @ 1/8/ each	3	0
Wis o Rāmīn. (Text) Fasc. 1–5 @ /6/ each	1	14
Zafarnāmah, Vol. I, Fasc. 1–9, Vol. II, Fasc. 1–8 @ /6/ each ..	6	6
Tuzuk-i-Jahāngīrī, (Eng.) Fasc. 1	0	12

ASIATIC SOCIETY'S PUBLICATIONS.

1. ASIATIC RESEARCHES. Vol. VII, Vols. XI and XVII, and Vols. XIX and XX @ 10/ each	50	0
2. PROCEEDINGS of the Asiatic Society from 1865 to 1869 (incl.) @ /6/ per No.; and from 1870 to date @ /8/ per No.		
3. JOURNAL of the Asiatic Society for 1843 (12), 1844 (12), 1845 (12), 1846 (5), 1847 (12), 1848 (12), 1866 (7), 1867 (6), 1868 (6), 1869 (8), 1870 (8), 1871 (7), 1872 (8), 1873 (8) 1874 (8), 1875 (7), 1876 (7), 1877 (8), 1878 (8), 1879 (7), 1880 (8), 1881 (7), 1882, (6), 1883 (5), 1884 (6), 1885 (6), 1886 (8), 1887 (7), 1888 (7), 1889 (10), 1890 (11), 1891 (7), 1892 (8), 1893 (11), 1894 (8), 1895 (7), 1896 (8), 1897 (8), 1898 (8), 1899 (8), @ 1/8 per No. to Members and @ 2/ per No. to Non-Members *N. B.—The figures enclosed in brackets give the number of Nos. in each Volume.*		
4. Centenary Review of the Researches of the Society from 1784–1883 ...	3	0
A sketch of the Turki Language as spoken in Eastern Turkistan by R. B. Shaw (Extra No., *J.A.S.B.*, 1878)	4	0
Theobald's Catalogue of Reptiles in the Museum of the Asiatic Society (Extra No., *J.A.S.B.*, 1868)	2	0
Catalogue of Mammals and Birds of Burmah, by E. Blyth (Extra No., *J.A.S.B.*, 1875)	4	0
Introduction to the Maithilī Language of North Bihār, by G. A. Grierson, Part II, Chrestomathy and Vocabulary (Extra No., *J.A.S.B.*, 1882)		
5. Anīs-ul-Musharrahīn	4	0
6. Catalogue of Fossil Vertebrata	3	0
7. Catalogue of the Library of the Asiatic Society, Bengal, by W. A. Bion	3	0
8. Ināyah, a Commentary on the Hidāyah, Vols. II and IV, @ 16/ each...	3	8
9. Jawāmlu-l-'ilm ir-riyāẓī, 168 pages with 17 plates, 4to. Part I	32	0
10. Khizānatu-l-'ilm	2	0
11. Mahābhārata, Vols. III and IV, @ 20/ each	4	0
12. Moore and Hewitson's Descriptions of New Indian Lepidoptera, Parts I–III, with 8 coloured Plates, 4to. @ 6/ each	40	0
13. Sharaya-ool-Islām	18	0
14. Tibetan Dictionary, by Csoma de Körös	4	0
15. Ditto Grammar	10	0
16. Kaçmīraçabdāmṛta, Parts I & II @ 1/8/	8	0
... ...	3	0

Notices of Sanskrit Manuscripts, Fasc. 1–29 @ 1/ each	29	0
Nepalese Buddhist Sanskrit Literature, by Dr. R. L. Mitra ...	5	0

N.B.—All Cheques, Money Orders, &c., must be made payable to the "Treasurer, Asiatic Society," only.

15-9-1900.

Books are supplied by V-P.P.

CC-0. In Public Domain. Funding by IKS-MoE